॥ अथ शुद्धिविवेकः प्रारभ्यते ॥

क्ष्मीरमणाय नमः ।



श्रीगणेशाय नमः ॥ हरतुदुरितजातंकेशवस्यैकबाहुर्विधुकमठविलीनःकेशिनःसंप्रविष्टः ॥ अनुपमनिभमारप्याशीतुसंप्र[illegible]
नीलःमंचशीर्षाभुजंगः ॥ १ ॥ चिरंतनानेकनिबंधसिद्धःसुसंप्रदायानुमतःस्फुटार्थः ॥ नत्वाहरिंकृष्णसंपादितः[illegible]
एषः ॥ २ ॥ संवीक्ष्यरत्नाकरपारिजातमिताक्षराहारलतादयोऽन्ये ॥ तथापितत्रास्तिसमानसानांभवेत्प्रमोदायममप्रयासः ॥ ३ ॥ [illegible]
[illegible]विहितकर्मानधिकारापादकोधर्मविशेषः । अशुद्धिस्तुतद्विरोधिधर्मविशेषःसपिंडजन्मादिनिमित्तकः । तदत्राशुद्धिविष[illegible]
[illegible]कथनेनशुद्धिर्विविच्यते । तत्रसपिंडजन्मादिश्चज्ञातोऽशुद्धिहेतुस्तेनयदिसपिंडादेर्जन्ममरणंवावृत्तमस्तिनचास्ति[illegible]
यदाप्रतिग्रहादिकंत्राज्ञायतेतदापितत्सकाशात्प्रतिग्रहादानेतदन्नभोजनेचनदोषः ॥ यदाहब्रह्मपुराणे ॥ आपदातृग्रहीतारो[illegible]
तथा ॥ अविज्ञातेनदोषःस्याच्छ्राद्धादिषुकदाचन ॥ विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तादिकंक्रमात् ॥ अथसामान्यतश्चातुर्वर्ण्यस्य[illegible]
तत्रमनुः । शुद्ध्येद्विप्रोदशाहेनद्वादशाहेनक्षत्रियः । वैश्यःपंचदशाहेनशूद्रोमासेनशुद्ध्यति ॥ ब्रह्मपुराणे । शौचाशौचंप्रकुर्वीरन्[illegible]
कराः ॥ वर्णसंकराअपकृष्टवर्णेनोत्कृष्टवर्णासुस्त्रीषुजाताः अनुलोमानांतुस्वजात्युक्तमशौचम् । तत्रापिविशेषमाहबृहस्पतिः । [illegible]
पिंडास्तुशुद्ध्यंतिप्रेतसूतके । त्रिरात्रेणसकुल्यास्तुस्नात्वाशुद्ध्यंतिगोत्रजाः ॥ अत्रदशाहपदंस्वस्वजात्युक्ताशौचोपलक्षकं सपिंडा[illegible]
[illegible]वयवःस्ववंश्याःसप्तमपुरुषादनंतरंदशमपुरुषंयावत्सकुल्याः दशमपुरुषादनंतरंजन्मनामाराविज्ञानेऽस्मत्कुलजा एवमाधार[illegible]
[illegible]गोत्रजाः ज्ञायमानजन्मनामांतुदशमपुरुषाधिकानांमरणजन्मनोः पक्षिणी पक्षिणीमसपिंडइत्यनेनाग्रेवक्ष्यते तदर्थस्यैकमा[illegible]
[illegible]वाक्यार्थः ॥ ब्राह्मणस्यसपिंडेब्राह्मणेमृतेदशरात्रेणशुद्ध्यति सकुल्येमृतेत्रिरात्रेण । तदूर्ध्वं ज्ञायमानजन्मनामेककुलजेमृतेपक्षिण्या । [illegible]

जेस्नानमात्रेण । क्षत्रियस्यसापिंडेक्षात्रियेमृतेद्वादशाहेनशुद्धिः । सकुल्येत्रिरात्रेण तदूर्ध्वंपक्षिण्यागोत्रजेस्नानमात्रेण वैश्यस्यसापिंडेवैश्येमृते
पंचदशादिनैः शुद्धिः । सकुल्येत्रिरात्रेण तदूर्ध्वंपक्षिण्या गोत्रजेस्नानमात्रेण. शूद्रस्यसपिंडेशूद्रमृतेमासेनशुद्धिः सकुल्येत्रिरात्रेण तदूर्ध्वंपक्षि
ण्या गोत्रजेस्नानमात्रेण । अत्रचसर्वत्रअहःपदंरात्रिपदंचअहोरात्रपरंज्ञातव्यम् । यदारात्रौसंध्ययोश्चमरणजन्मनीभवतः तदातीतदिनेनैवस
हाहोरात्रोग्राह्यः । यदाहकश्यपः । रात्रावेवसमुत्पन्नेमृतेरजसिसूतके । पूर्वमेवदिनंग्राह्यंयावन्नैवोदितोरविः ॥ उदितेतुयदासूर्येनारीणांह
श्यतेरजः ॥ जननंवाविपत्तिर्वायस्याहस्तस्यशर्वरी ॥ अंगिराः ॥ चतुर्थेहनिकर्तव्यःसंस्पर्शोब्राह्मणस्यतु । पंचमेहनिविज्ञेयःसंस्पर्शःक्षत्रि
यस्यतु । षष्ठेह्निचथतुवैश्यस्याविज्ञेयस्पर्शनंबुधैः । दशमेहनिशूद्रस्यकार्य्यंसंस्पर्शनंबुधैः ॥ अत्रेदंतात्पर्यम् । सर्वाशौचस्यतृतीयभागेऽ
तीतेऽगस्पर्शःकर्तव्यः । तथाचदेवलः । आशौचकालाद्विज्ञेयंस्पर्शनंतुत्रिभागतः । शूद्रविट्क्षत्रविप्राणांतथाशास्त्रप्रदर्शनात् ॥ एवंच
सतिब्राह्मणादीनांदशाहादिभ्योमनूक्तेभ्योयदूनाधिकसमयत्वमशौचस्यक्वचिदंतरोक्तंतद्गुणयुक्तगुणहीनविषयंज्ञेयम् । अथजननाशौचम् ।
तत्रमनुः । जननेप्येवमेवस्यान्निपुणांशुद्धिमिच्छताम् । सर्वेषांशावमाशौचंमातापित्रोस्तुसूतकम् ॥ मातुर्वासूतकंप्राहुरुपस्पृश्यःपिताशुचिः ॥
अस्यार्थः । जननेजन्मन्यपिएवमेवमरणवदाशौचंदशाहादिव्यापकंभवति । अयंविशेषः । शावमाशौचंमरणेतुकमस्पृश्यत्वंसर्वेषा
माशौचभागिनांसूतकंप्रसवनिमित्तकंपुनरस्पृश्यत्वंमातापित्रोरेव तत्रापिविशेषमाह । मातुर्वेति । वाशब्दएवकारार्थः मातुरेवसूतकंदशाह
व्यापकमस्पृश्यत्वलक्षणंप्राहुः । उपस्पृश्यस्नात्वापिताशुचिःस्पृश्योभवतीति आशौचमितिअशुचेर्भावइति इगंताच्चलघुपूर्वादित्यण्
तत्र शुचीभरित्यादिनाउभयपदवृद्धिः । संवर्तः । जातेपुत्रेपितुः स्नानंसचेलस्यावधीयते । माताशुद्ध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुः ।

ऽांगिराः । सूतकेसूतिकावर्जंमंगस्पर्शोनदुष्यति । संस्पर्शेसूतिकायास्तुस्नानमेवविधीयते ॥ यदितुजनकःपत्नीसंस्पर्शंसूतकेकरोति तदा
तस्यापियावत्सूतकमस्पृश्यत्वम् । तथाचपाराशरः । यदिपत्न्यांप्रसूतायांद्विजः संपर्कमिच्छति । सूतकंतुभवेत्तस्ययदिविप्रः षडंगवित् ॥
षडंगविदपिविप्रोयदिसंपर्कंसंस्पर्शंकरोति प्रसूतायाःपत्न्यास्तदातस्यसूतकंदशाहमस्पृश्यत्वंभवतीत्यर्थः । अत्रसंपर्कोभिगमन
मितिव्याख्यानमप्युक्तम् । मातुरेवसूतकंतांस्पृशतस्तुपितुर्नेतरेषामितिसुमंतुनैकमूलत्वात् । ब्रह्मपुराणे । सूतकेतुमुखंदृष्ट्वाजातस्यजनकस्ततः
शुचिः । कृत्वासचैलंस्नानंतुशुद्धोभवतितत्क्षणात् ॥ अन्याश्चमातरस्तद्वत्तद्गेहंनव्रजंतिचेत् । सपिंडाश्चापिसंस्पृश्याःसंतिसर्वेपिनित्यशः ॥
अन्यामातरःसपत्नीमातरस्तद्गेहंनव्रजंतितद्गेहंगत्वातांचेन्नस्पृशंतितदाशुद्धाएवस्नानंविनापि । एवंसपिंडाअपितत्स्पर्शेतुस्नानेनशुद्ध्यंति
एवमेव हारलता । आचारोपि अत्रस्त्रीजन्मनिस्नानानुपदेशात्पितुरपिस्नानंविनैवशुद्धिरितिज्ञेयम् । तथा । ब्राह्मणीक्षत्रियावैश्याप्रसूतादशभि
र्दिनैः ॥ गतैःशूद्राचसंस्पृश्यात्रयोदशभिरेवचं ॥ यातुसूतिकासर्ववर्णानांदशरात्रेणशुध्यतीतिशूद्रायाअपिदशरात्रेणशुद्धिःस्पर्शःकथिता
प्रचेतसा । सासच्छूद्रीविषयाज्ञातव्या । पैठीनसिः । सूतिकांपुत्रजननींविंशतिरात्रेणस्नातांसर्वकर्माणिकारयेतमासेनस्त्रीजननीम् । अस्यार्थः ।
पुत्रेजातेसूतिकांविंशतिरात्रेऽतीतेपुनःकृतस्नानांपाकादिदृष्टार्थमदृष्टार्थंचकर्मकारयेत् । स्त्र्यपत्योत्पत्तौमासेऽतीतेसर्वकर्माणिकारयेत् । इदं
तुशूद्रातिरिक्तविषयंज्ञातव्यम् ॥ अथजननमरणाशौचयोर्नियमः । तत्रजाबालिः । संध्यांपंचमहायज्ञान्नैत्यिकंस्मृतिकर्मच । तन्मध्ये
हापयेत्तेषांदशाहांतेपुनःक्रिया ॥ नैत्यिकंवैधस्नानतर्पणादितन्मध्येऽशौचमध्येहापयेत्त्यजेदित्यर्थः । दशाहांतइत्यशौचांतोपलक्षणंतेना
शौचांतेतेषांब्राह्मणादीनांपुनःक्रियासंध्यादिकर्मकरणमित्यर्थः । मनुः । उभयत्रदशाहानिकुलस्यान्नंनभुज्यते । दानंप्रतिग्रहोहोमःस्व

ध्यायश्चनिवर्तते ॥ उभयत्रजननेमरणेचदशाहानींत्यशौचकालोपलक्षणम् । तेनदशाहानितत्तदशौचकालंयाप्यकुर्वन्त्यासिद्धान्नंनभोक्त
व्यमित्यर्थः । अत्रहोमेविशेषमाह छंदोगपरिशिष्टेकात्यायनः ॥ सूतकेकर्मणांत्यागःसंध्यादीनांविधीयते । होमःश्रौतेतुकर्तव्यःशुष्कान्ने
नापिवाफलैः ॥ अकृतंहापयेत्स्मार्तेतदभावेकृताकृतम् । कृतमोदनसक्त्वादितंदुलादिकृताकृतम् । व्रीह्यादिचाकृतंप्रोक्तमितिद्रव्यंत्रिधाबुधैः ॥
अस्यार्थः । अशौचेसंध्यादीनांविहितकर्मणांत्यागः । अग्निमतातुश्रौताग्नौशुष्कान्नेनफलेनवाहोमः कर्तव्यः । स्मार्ताग्नौतुव्रीह्यादि
मातंदुलादिरूपद्रव्यंपरद्वाराहोमःकारयितव्यःकृतमोदनसक्त्वादिपरद्वारापिनहापयेत् । अत्रतंदुलादीत्यादिपदेनमाषमुद्गादिग्रहणम् । व्री
ह्यादिपदेनयवगोधूमादिग्रहणम् । ओदनसक्त्वादिपदेनलाजमोदकलड्डुकादीनांग्रहणम् । दानप्रतिग्रहयोर्विशेषमाह मनुः । जातेकुमारे
तदहःकामंकुर्यात्प्रतिग्रहम् । हिरण्यधान्यगोवासस्तिलान्नगुडसर्पिषाम् । शंखलिखितौ । कुमारप्रसवेनाड्यामच्छिन्नायांगुडतिलहिरण्य
वस्त्रप्रावरणगोधान्यप्रतिग्रहेष्वदोषः । तदहरित्येकेगुर्वर्थंकर्मकुर्वतः प्रावरणंकंबलादि । अयमर्थः । पुत्रजन्मनिनाडीछेदात्पूर्वंहिरण्यधान्या
दिंदद्यात् दातुःप्रतिग्रहीतुश्चदोषोनभवति । गुर्वर्थंप्रतिग्रहीतुस्तद्दिनेनाडीच्छेदादनंतरमपिनदोषः । ब्रह्मपुराणे । देवाश्चपितरश्चैवपुत्रेजाते
द्विजन्मनाम् ॥ आयांतितस्मात्तदहःपुण्यंषष्ठंचसर्वदा ॥ तत्रदद्यात्सुवर्णंचभूमिंगांतुरगंरथम् ॥ छत्रंछागंचमाल्यंचशयनंचासनंगृहम् ॥ हश्र
दंचमददेत्स्यत्वेनान्नंब्राह्मणेष्वपि । तदहःपुण्यंषष्ठंचदिनंपुण्यमित्यर्थः । पुत्रोत्पन्नेनाडीच्छेदात्पूर्वंजातश्राद्धमहिरण्येनकर्तव्यम् । [illegible]
श्राद्धेचक्नेषनपिंडदानादिनास्तीतिभर्तृयज्ञस्वामिनाविवित्तिरत्नाकरः । मार्कंडेयः । षष्ठेह्निरात्रियागंतुजन्मदानांचकारयेत् । रक्षणीयातथा
षष्ठीनरात्रौतुविशेषतः । जन्मदानांषोडशमातृणांषष्ठिकासहितानांरात्रियागंकुर्यादित्यर्थः । स्मार्तक्रियानिवृत्तौविशेषमाह संवर्तः । जात

प्रतिग्रहोहोमःस्वाध्यायःपितृकर्म्मच ॥ प्रेतपिंडक्रियावर्जमशौचेविनिवर्तते ॥ प्रेतपिंडदानादिवर्जं [illegible]
तदर्थः । वस्तुविशेषेदोषाभावमाहमरीचिः । लवणेमधुमांसेचपुष्पमूलफलेषुच । शाककाष्ठतृणेष्वप्सुदधिसर्पिःपयःसुच ।
तैलौषध्याजिनेचैवपक्वापक्वेस्वयंग्रहे ॥ पुण्येषुचैवसर्वेषुनाशौचंमृतसूतके ॥ पयःपदमत्रदुग्धपरम् । दध्यादिसाहचर्यात्तेनापि
तदनुरोधात्र । पक्वंसक्तुमोदकादि । अपक्वंतंडुलादि । तत्स्वयंगृह्यमाणंस्वाम्यनुमत्यानदोषोभवतीत्यर्थः [illegible]
स्वयंग्रहइत्यन्वेतिनतुलवणादिष्वपि । एवमेवरत्नाकरस्वरसउन्नीयते तत्स्वयंगृह्यमाणमितिपूर्वपदाकांतरयपक्वापक्व [illegible]
[illegible]प्रत्यवमर्शात् तेनलवणादीनामशुचिद्वारापिग्रहणेदोषाभावइतिसिद्धम् । अथवर्णानांविशेषतोशौचंतत्रदक्षः । सद्यः शौचं [illegible]
[illegible]चतुरहस्तथा ॥ षड्दशद्वादशाहश्चपक्षोमासस्तथैवच । मरणांततथाचान्यदशापक्षास्तुसूतके ॥ [illegible]
[illegible]मशेषतः । सूतकमशौचंतद्दशविधंभवति । तत्रसद्यःशौचंसद्यस्तत्क्षणे स्नानमात्रेणयत्रशौचंभवति तत्सद्यःशौचं [illegible]
[illegible]शौचम् । एकाहएकाहोरात्रिशापकम् । एवंत्र्यहाद्यपि तत्कालव्यापकमशौचंमरणांतमन्यादितिजननमरणनिमित्तका [illegible]
मरणांतमन्यदशौचंदशममित्यर्थः । तत्रसद्यःशौचमाह । ग्रंथार्थतोविजानातिवेदमंगैः समन्वितम् ॥ सकल्पंसरहस्यंचक्रियावां
श्चेन्नसूतकम् ॥ अस्यार्थः ॥ यदि ग्रंथतोऽर्थतश्चवेदंविजानातिसम्यक्सिद्धांतन्यायानुसारेणअर्थं जानाति सकल्पंकल्पोज्यो [illegible]
माद्यनुष्ठानपद्धतिस्तत्सहितं अंगैःसमन्वितं शिक्षाद्यपरपंचांगसहितंसरहस्यंरहस्यप्रतिपादकब्रह्ममीमांसादिनिर्णीतार्थसहितंजाना
ति क्रियावान् श्रौतस्मार्ताग्निहोत्रादिक्रियावान्भवति । तदासूतकंनभवति एकाहाद्यशौचं न भवति । तेन सद्यःशौचं भवतीत्यर्थः । तथा

एकाहाद्ब्राह्मणः शुद्ध्येद्योग्निवेदसमन्वितः ॥ हीनेहीनतरेचैवत्र्यहश्चतुरहस्तथा ॥ अग्निः श्रौतः स्मार्तश्च । वेदः सांगोज्ञातार्थश्च । ब्राह्मणश्चात्र
विहितक्रियैकदेशवान्विवक्षितः । तस्यएकाहः हीनः श्रौताग्निहीनः स्मार्ताग्निवान्सांगसार्थज्ञानसंपूर्णवेदवान् तस्यचतुरहोऽशौचका
लः । बृहस्पतिः । त्रिरात्रेणविशुद्ध्येत्तुविप्रोवेदाग्निसंयुतः । पंचाहेनाग्निहीनस्तुदशाहाद्ब्राह्मणब्रुवः ॥ अत्राग्निःस्मार्तः । तद्वतोवेदज्ञ
स्यचपूर्ववत्अहः । अग्निद्वयहीनस्य अर्थाद्वेदांगशून्यकृत्स्नवेदाध्यायिनः पंचाहः । परिशेषादग्निद्वयहीनस्यवेदैकदेशाध्यायिनः षडहः ।
अत्रवाक्यद्वयतुल्येन्यायतयाअग्निद्वययुतस्याविज्ञातार्थकृत्स्नवेदवतः । सकलविहितक्रियावतः एकाहः । तथाग्निद्वययुतस्यवेदविही
नस्यत्र्यहः । ब्राह्मणब्रुवस्यदशाहः । ब्राह्मणब्रुवश्चपरिभाषितोव्यासेन । गर्भाधानादिभिर्युक्तस्तथोपनयनेनच । नकर्मकृन्नचाधीतेसभवे
द्ब्राह्मणब्रुवः ॥ ॥ तदयंसर्वैकवाक्यतयार्थः । सांगसार्थज्ञानवेदवतोऽग्निद्वययुतस्यसकलविहितक्रियावतोविप्रस्यसद्यःशौचम् । अवि
ज्ञातार्थसांगवेदवतोग्निद्वययुतस्यएकाहः । श्रौताग्निहीनस्मार्ताग्निमतःसांगसार्थज्ञानवेदवतः त्र्यहः । वेदशून्यस्याग्निद्वयवतश्चत्र्यहः ।
सांगसार्थज्ञानकृत्स्नवेदाध्यायिनोग्निद्वयहीनस्यचतुरहः । अंगशून्यकृत्स्नवेदाध्यायिनोग्निद्वयहीनस्यपंचाहः वेदैकदेशाध्यायिनोग्नि
द्वयहीनस्यषडहः । ब्राह्मणब्रुवस्यदशाहइति । पराशरः । संपर्काद्दूष्यतेविप्रोजननेमरणेषुच ॥ संपर्काद्विनिवृत्तानांनप्रेतंनै
वसूतकम् ॥ प्रेतंमरणाशौचमित्यर्थः । अत्रसर्वैचैतेयथोक्ताः सद्यःशौचादिकाअपकर्षपक्षाः सपिंडांतराणामशौचिनांसंपर्काभावे
सतिबोद्धव्याः । संपर्केचतेषामिवदशाहाद्यशौचंभवति । आचारोपितथा संपर्कश्चात्रएकत्रासनशयनभोजनादिरूपोविवक्षि
तइतिरत्नाकरः । क्षत्रियवैश्ययोरप्यग्निमतोर्दशाहद्वादशाहौ । तथाच पराशरः । क्षत्रियस्तुदशाहेनस्वकर्मनिरतः शुचिः । तथैव

द्वादशाहेनवैश्यः शुद्धिमवाप्नुयादिति । शूद्रस्यापिविशेषमाहयाज्ञवल्क्यः । क्षत्रस्यद्वादशाहानिविंशत्पंचदशैवतु ॥ त्रिंशद्दिनानिशूद्रस्य
तदर्द्धंन्यायवर्तिनः । न्यायवर्तिनः श्रद्धयाद्विजशुश्रूषयाचयज्ञादिशूद्रविहितक्रियावतः । शूद्रस्यपंचदशाहाशौचंसर्वचैतदशौचसंकोचाभि
धानंनियतेष्वेव होमादिविधिषुनतुसर्वेषुदानान्नभोजनप्रतिग्रहादिषुतेषुकर्तव्येषुब्राह्मणादीनांदशाहादिकंसंपूर्णाशौचमेवानुवर्तते इति
मिताक्षराकारादयः । तथाहि दशाहंशावमाशौचमितिसामान्यप्राप्तदशाहबाधपुरस्सरमेवह्येकाहाद्ब्राह्मणः शुद्ध्येदित्यादिविधायकंभवति
बाधस्यचानुपपत्तिनिबंधनत्वाद्यावत्यंशेबाधितेनुपपत्तिप्रशमोनभवति तावदनेनबाधितव्यं । अतःकियदनेनबाधितव्यमित्यपेक्षायामपेक्षि
तविशेषसमर्पणक्षमस्याग्निवेदसमन्वितेत्यादिवाक्यशेषस्यदर्शनादग्निहोत्रादौकर्मणिस्वाध्यायादौचव्यवतिष्ठते । नपुनर्दानादावपि तथा
चब्राह्मणस्यस्वाध्यायाध्यापनानिवृत्त्यर्थमह्वः शौचमिति । शुद्ध्येद्विप्रोदशाहेनेत्येवमादिभिर्मन्वादिवचनैरेकवाक्यतातथाउभयत्रद
शाहानिकुलस्यान्नंनभुज्यते । इतिदशाहपर्यंतभोजनादिकंप्रतिषेधयद्भिः यमादिवचनैरविरोधोपिसिध्यतीत्यतःक्वाचित्कमेवेदमशौच
विधानंनपुनःसर्वसंव्यवहारादिगोचरमित्यलमतिप्रपंचेनेतिमिताक्षराकारआह । हारलताकारोपि ॥ अयंचाशौचसंकोचोहोमाध्ययनार्थएव
च ॥ नतुसंध्यापंचमहायज्ञान्नैत्यिकंस्मृतिकर्मच । तन्मध्येहापयेत्तेषांदशाहांतेपुनःक्रिया । उभयत्रदशाहानिकुलस्यान्नंनभुज्यते ॥ दानंप्रति
ग्रहोहोमः स्वाध्यायश्चनिवर्तते । इतिजाबालिवचनयमवचनाभ्यांप्रतिषिद्धानांसंध्याप्रपंचमहायज्ञमृत्तिकाग्रहणमार्जनप्राणायामतर्पणाद्युपेत
प्रधानक्रियारूपस्नानात्मकनैत्यिकस्मृतिकर्मकुलान्नभोजनदानप्रतिग्रहकाम्यहोमस्वाध्यायानामप्यनुष्ठानार्थः । अनेकवचनविरोधात्
अतोवेदाग्निसंयोगादिनाएकाहत्र्यहादिभिः सर्वाशौचनिवृत्तिरितिव्यामोहएवेत्याहपारस्करगृह्यव्याख्याताहरिहरमिश्रोप्येवमाह । एवंच

॥ १ ॥

शिष्टाचारएवात्रशरणम् । यावज्जीवाशौचदशममाहदक्षः । व्याधितस्यकदर्यस्यऋणग्रस्तस्यसर्वदा ॥ क्रियाहीनस्यमूर्खस्यस्त्रीजितस्यविशे
षतः । व्यसनासक्तचित्तस्यपराधीनस्यनित्यशः । श्रद्धात्यागविहीनस्यभस्मांतंसूतकंभवेत् ॥ कदर्योत्रदेवलेनपरिभाषितः । आत्मानंधर्मकृ
त्यंचपुत्रदारांश्चपीडयन् ॥ लोभाद्यः प्रचिनोत्यर्थान्सकदर्यइति स्मृतः ॥ अत्रसर्वदेतिप्रत्येकमभिसंबध्यते तेनसर्वदाव्याधितस्यसर्वदाऋ
णग्रस्तस्यमरणांतमशौचंभवतीत्यादिरर्थउन्नेयइतिरत्नाकरः । व्याधितस्यकर्मासामर्थ्यापादकव्याधिमतः । ऋणग्रस्तस्यनित्यंधनिकाधि
षितस्य । क्रियाहीनस्यउपनयनादिक्रियाहीनस्य इदंचदृष्टांतत्वेनोपात्तम् ॥ मूर्खस्यगायत्रीरहितस्यस्त्रीजितस्यभार्यावशतयाशुरुनिभ
र्त्सकस्य व्यसनासक्तचित्तस्यसंध्याकालेप्यकार्य्यगतचित्तस्य पराधीनस्यश्राद्धादिकालेप्यनापन्नाधिस्य श्रद्धात्यागविहीनस्यश्रद्धा
वेदबोधितेष्वित्यमेवेतिनिश्चयः त्यागोत्रावश्यकश्राद्धादि ताभ्यांरहितस्य । सर्वदेतिप्रत्येकमभिसंबध्यते । तेनसर्वदाव्याधितादेर्नाशौचनिवृ
त्तिः । प्रायश्चित्तेनकर्मण्यनधिकारइति शुद्धिप्रदीपः । इदंचाशौचंजननमरणानिमित्तकाद्भिन्नमेवदशमं । ब्रह्मपुराणे । अन्यपूर्वागृहेयस्य
भार्यास्यात्तस्यनित्यशः । अशौचंसर्वकार्येषुगृहेभवतिसर्वदा । दानंप्रतिग्रहोहोमः सर्वंतस्यवृथाभवेत् । गेहेत्युपादानात् यस्यगृहकृत्य
कारिणीअन्यपूर्वाभार्याभवतितस्यब्राह्मणादेः सर्वस्यसर्वदाशौचंभवतीति । एवमेवरत्नाकरादयः संवः । हीनवर्णातुयानारीप्रमादा
त्प्रसवंव्रजेत् ॥ प्रसवेमरणेतज्जमशौचंनोपशाम्यति ॥ हीनवर्णाशूद्रा । प्रमादाद्रागांधतयाकृतसंगात् । ततोयमर्थः अपरिणीतायाशूद्रायामुत्तम
वर्णेनरागकृतसंगमात्प्रसूतास्यात्तदातत्प्रसवमरणयोः गर्भजनकस्ययावज्जीवमशौचमित्यर्थः । अथाशौचसंकरः । तत्रकूर्मपुराणे ।
सपिण्डानांयोगपद्येतुज्ञेयाशुद्धिर्गरीयसी ॥ मरणोत्पत्तियोगेतुगरीयोमरणंभवेत् ॥ सपिण्डानामशौचानांविषमकालव्यापकानांयौगपद्येसकलमिर

स्यपरोपनिपातेऽधिकादिनव्यापकेनाशौचेनातीतेन शुद्धिर्ज्ञेया । अस्यापवादमाह । मरणोत्पत्तौ तु मरीयो मरणं बलवदिति । म
ननमरणाशौचसंकरे मरणाशौचमल्पकालव्यापकमपि मरीयः । तेन जननाशौचमध्ये मरणनिमित्तकसद्यःशौचांतरोपनिपाते नैव जन
नाशौचं बाध्यते । सजातीयसमानदिनव्यापकव्यवस्थामाह । ब्रह्मपुराणे । आद्यं भागद्वयं यावत् सूतकस्य तु सूतके । द्वितीयेप
तिते चाद्यात् सूतकाच्छुद्धिरिष्यते । अत ऊर्ध्वं द्वितीयात्तु सूतकांताच्छुचिः स्मृता एवमेव विचार्यः स्यान्मृतके मृतकांतरे ॥ अत्र
चतुर्धा विभक्ताशौचकालस्य आद्यभागद्वये यदि समानदिनव्यापकं सजातीयमशौचांतरमापतति तदा पूर्वाशौचव्यपगमेन शुद्धिः ॥ अपि
तत्रापि अशौचांतिमदिने आशौचांतरोपनिपाते विशेषमाह विष्णुः । रा
त्रिशेषे दिनद्वयेन प्रभाते दिनत्रयेणेति अत्र रात्रिशब्दोऽहोरात्रपरः ॥ रात्रिरहोरात्रः शेषो यत्र तद्रात्रिशेषमशौचं तस्मिन्नशौचे शौचांतरो
पनिपाते दिनद्वयेन शुद्धिः ॥ अवशिष्टाहोरात्रादधिकेनादिनत्रयेण शुद्धिः ॥ यदि त्वशौचांतदिने समं दिनद्वयं स्यात्तदा एकेनेत्येवं ब्रूयात् ॥
तदयमर्थः । अशौचांतिमेऽहोरात्रे यद्यपरं सम्पूर्णाशौचमापतति तदा पूर्वाशौचांतरादधिकेनादिनद्वयेन शुद्धिरिति ॥ प्रभातेऽशौचांतस्याहोरात्रशेषे
सूर्योदयात् प्राक्प्राचीप्राकाशे वृत्तसंपूर्णाशौचांतरोपनिपाते सूर्योदयादनंतरादिनत्रयेण शुद्धिः ॥ अत्र च अथ यदि दशरात्रासन्निपाते
पुराद्यं दशरात्रमशौचमित्यादिवाक्येन परिशेषेण च संपूर्णसमानजातीयाशौचांतरोपनिपाते व्यवस्था विज्ञायते ॥ तथाहि ॥ गरीयसा ल
दिनव्यापकानां सजातीयानां बाध्यत्वविधानात् विजातीयानां जननाशौचानामल्पदिनव्यापकत्वेनापि मरणाशौचेन बाध्यत्वविधानात् परि
शेषेणाबाध्यं समानकालव्यापकं सजातीयं यत्राशौचद्वयं निपतति तत्रेयं व्यवस्था ॥ विषमदिनव्यापकयोर्विजातीययोश्चानेयं व्यवस्था । तत्र

शुद्धि गरीयसेवव्यवस्थेति ॥ एवमेवरत्नाकरप्रभृतयः । असंपूर्णाशौचानांसमकालव्यापकानांयोगपद्यउत्तरेणैवशुद्धिः पूर्वव्यवस्थायाः संपूर्णाशौ विवे

६ ॥ चविषयत्वात् ॥ वर्द्धितेव्यहाशौचेत्र्यहाशौचेवसंपूर्णमशौचांतरंयदिनिपततितदाव्यहत्र्यहयोर्लघुत्वाद्गुरुतराग्रिमाशौचव्यपगमेनैवशुद्धि

रितिप्रतिभाति । देवलः । परतःपरतःशुद्धिरद्यवृद्धौविधीयते । स्याच्चेत्पंचतमादह्नःपूर्वेणाप्यनुशिष्यते । अस्यार्थः । एकस्मिन्नशौचेस

तितच्छेषदिनाभ्यंतरेअन्यसमानाशौचांतरोपनिपातेपंचमादह्नःपरतः । परेणचेत्स्यादाद्यवृद्धिस्तदापरतःपरेणसंपूर्णाशौचेनातीतेनशुद्धिः । पू

र्वेणाप्यनुशिष्यतेतिपंचतमादह्नः । पूर्वेणतादृशाशौचांतरोपनिपातेपूर्वेणैवाशौचेनापगतेनशुद्धिः । एवंचेतद्वाक्यंब्रह्मपुराणीयवाक्यसमा

नार्थमेवेतिमंतव्यम् । कूर्मपुराणे । आद्यवृद्धिर्यदाशौचमूर्ध्वंचेतेनशुद्ध्यति । अथचेत्पंचमीरात्रिमतीत्यपरतोभवेत् । ऊर्ध्वंप्रथमाशौचादनंतर

माद्यवृद्धिर्यदाशौचंभवतितदातेनप्रथमेनैवशुद्धिः । अथचेत्पंचमीरात्रिमतीत्यपरतोभवेत् । तदापरतःपरेणशुद्धिरित्यर्थः एवंचब्रह्मपुराण

कूर्मपुराणदेवलवाक्यैकवाक्यतयाविष्णुवाक्यमपिसंपूर्णाशौचप्रथमार्धविषयमित्यवसीयते ॥ तदाहविष्णुः ॥ जननाशौचमध्येयद्यपरंजननं

स्यात्तदापूर्वाशौचव्यपगमेनशुद्धिः ॥ रात्रिशेषेदिनद्वयेनप्रभातेदिनत्रयेण मरणाशौचमध्येज्ञातिमरणेप्येवंक्रम् ॥ रात्रिशेषहत्यादिपूर्वमेवव्या

ख्यातम् । बौधायनः । जननमरणयोःसन्निपातेसमानेदशरात्रयः । अथयदिदशरात्राःसंनिपतेयुराद्यंदशरात्रमशौचमानवमात्दिवसात्

समानेएकस्मिन्दिनेजननेजननांतरस्यमरणेमरणांतरस्यसंनिपातेदशरात्रएवनन्यूनंनाधिकमशौचंकर्तव्यंदिनांतरेआनवमादिवसात् यदि ॥ ६

दशरात्रासंनिपतेयुराद्यंदशरात्रमशौचंस्यात् । अयंसामान्यविधिः । ब्रह्मपुराणैकवाक्यतयापंचमदिनानंतरोपनिपातबाधकेनापोद्य

तेएवमेववाक्यांतराविरोधोप्यूह्यः । अत्रचप्रकरणेपंचमपदंसंपूर्णाशौचार्धोपलक्षकंनवमपदंसंपूर्णाशौचोपांत्यदिनपरम् । दशरात्रपदं

संपूर्णाशौचोपलक्षकम् । यमः ॥ अद्यवृद्धावशौचंतु पश्चिमेनसमापयेत् । एतदसंपूर्णाशौचानांसंनिपातेज्ञेयम् ॥ लघुहारीतः । सूतकेमृतकंचे
त्स्यान्मृतकेसूतकंतथा । मृतेनसूतकंगच्छेन्नेतरत्सूतकेनतु । तदेषाव्यवस्था । दशाहाशौचेपंचमदिनपर्यंतंयदिद्वितीयंसजातीयं
दशाहाशौचमापततितदापूर्वाशौचव्यपगमेनशुद्धिः । पंचमदिनानंतरंनवमदिनपर्यंतंद्वितीयेशौचेसत्याग्रिमाशौचव्यपगमेनशुद्धिः ।
दशमदिनेसंपूर्णाशौचांतरेसतितद्दिनानंतरंदिनद्वयेनशुद्धिः । दशमदिनरात्रिशेषेअरुणोदयवेलायांसंपूर्णाशौचांतरोपनिपातेसूर्योदया
दनंतरंत्रिरात्रेण । एवंक्षत्रियवैश्यशूद्राणांसंपूर्णस्वस्वाशौचपूर्वार्द्धेसमानदिनव्यापकमशौचांतरंयदिभवतितदापूर्वाशौचव्यपगमेन
शुद्धिः । अग्रिमार्द्धेअग्रिमाशौचव्यपगमेनशुद्धिः । अशौचांतदिनेअशौचांतरोपनिपातेसर्वेषांतद्दिनानंतरंदिनद्वयेनशुद्धिः । अशौचांतदि
नशेषप्रभातकालेऽशौचांतरोपनिपातेआधिक्येनदिनत्रयेणशुद्धिः ॥ त्र्यहाद्यसंपूर्णाशौचेसमकालाशौचांतरोपनिपाते अग्रिमाशौचव्यप
मेनशुद्धिः । सूतकाभ्यंतरेमरणोपनिपातेमरणेवासतिसूतकोपनिपातेमरणाशौचव्यपगमेनैवशुद्धिः । एषाचकुलप्रयुक्ताशौचे
व्यवस्था । यत्तुस्त्रीणांस्वप्रसवनिमित्तमशौचंतत्प्रातिस्विकंतदन्येननबाध्यते । तेनस्त्रीणांपतिमरणेपिपुत्रजन्मानिविंशतिदिनेभ्यऊर्द्धक
न्याजन्मानिमासादूर्ध्वंश्राद्धाद्यदृष्टार्थकर्मणिदृष्टार्थपाकादिकर्मणिचाधिकारः । एवमेवप्रामाणिकव्यवहारः अत्रपित्रादिमरणेअशौ
चांतरेपनिपातेविशेषोदर्शितोहारलतामिताक्षराभ्यां । सतुरत्नाकरादिषुदर्शनाभावादुपेक्षितः । अथविदेशस्थाशौचम् । तत्रमनुः । विगतं
तुविदेशस्थंशृणुयाद्योह्यनिर्दशम् । यच्छेषंदशरात्रस्यतावदेवाशुचिर्भवेत् । अतिक्रांतेदशाहेतुत्रिरात्रमशुचिर्भवेत् । संवत्सरेव्यती
तेतुस्पृष्ट्वैवापोविशुद्ध्यति । यद्देशेमरणेतद्दिनेवार्तानप्राप्तासाविदेशः । तत्रविगतंविनष्टंअनिर्दशमनतीतदशाहं यः पुरुषःशृणुयात्त

स्ययच्छेषमवशिष्टंतावद्देवाशुचिर्भवेत् । अतिक्रांतेदशाहेतुत्रिरात्रमशुचिर्भवेत् । संवत्सरेऽतिक्रांतेतुस्पृष्ट्वैवापोविशुद्ध्यति । अत्र अनिर्दशइतिदशशब्दः । संपूर्णाशौचोपलक्षकः । दशरात्रदशाहशब्दावपिसंपूर्णाशौचोपलक्षकौ तेनायमर्थः । विदेशस्थसपिंड मरणश्रवणेऽशौचकालाऽनपगमेयावद्दवशिष्टमशौचकालस्यतावदशौचंचतुर्भिर्वर्णैः कर्तव्यम् । अतिक्रांतेतुसंपूर्णाशौचकालेत्रिरा त्रमशौचंकर्तव्यम् । वर्षानंतरंसपिंडमरणश्रवणेस्नानमात्रेणशुद्धिः । एवंचैतदेकवाक्यतयास्वेस्वेऽहन्यव्यतीतेतुत्रिरात्रमशुचिर्भवेत् इत्यत्रस्वस्वाहःपदंचातुर्वर्ण्यसंपूर्णाशौचकालपरमेव । तेनत्रिरात्रादावशौचकालेऽव्यतीतेज्ञात्यादिमरणश्रवणेऽशौचाभावएव । यदि तुस्वेस्वेऽहनियस्ययावानशौचकालस्तदतिक्रमेत्रिरात्रमविशेषेणेवेत्यर्थःस्यात्तदैकाहाशौचातिक्रमेपित्रिरात्रंस्यात् । एवंसतिन्यायसि द्धिरागामिकश्चाशौचातिक्रमे । शौचापकर्षःसाधुसमर्थितः स्यात् । तस्मादसंपूर्णाशौचेऽहादावतीतेस्नानोदकदानेएव । यथाचयाज्ञवल्क्यः प्रोषितेकालशेषःस्यात्पूर्णेदत्त्वोदकंशुचिरितिपूर्णेऽशौचकालइत्यर्थः अत्रोदकदानेनस्नानमप्याक्षिप्यते । प्रेतोदकदानस्यसर्वत्रस्नानपूर्व कत्वात् । मनुः । निर्दशंज्ञातिमरणंश्रुत्वापुत्रस्यजन्मच ॥ सवासाजलमाप्लुत्यशुद्धोभवतिमानवः ॥ अत्रनिर्दशंनिष्क्रांताशौचो पलक्षकमित्यर्थः । तेनैवतदपित्रिरात्राशौचातिक्रमविषयंबोद्धव्यम् । सपिंडमरणएवदशाहानंतरंश्रवणेविशेषमाहगौतमः । आनामि श्रुत्वाचोर्ध्वंदशम्याःपक्षिणीति । दशम्याआशौचांतररात्रेरूर्ध्वं सपिंडमरणंश्रुत्वापक्षिणीअशौचकालःपुरुषस्यभवति । आनामि वर्तमानंदिनद्वयसहितारात्रिः । तुल्यतयापूर्वापररात्रिसहितंदिनंवा । देवलः । अशौचाहःस्वतीतेषु बंधुश्चेच्छ्रूयतेमृतः । तत्रत्रिरात्रम शौचंभवेत्संवत्सरांतरे । ऊर्ध्वंसंवत्सराद्यांतुश्रूयतेचेन्मृतःस्वकः । भवेदेकाहमेवात्रतच्चसंन्यासिनांनतु ॥ नाशुच्यंप्रसवस्यास्तिव्रतीतेषुपि

नेष्वपि । तदत्र गौतमोक्तपक्षिणी संवत्सरादूर्ध्वं व्यवतिष्ठते ततःपूर्वं देवलेन त्रिरात्राभिधानात् । देवलोक्त एकाहस्तदुपरि मासत्रये व्यवतिष्ठते । तदयं सर्वैकवाक्यतयार्थः । अनतीताशौचकालं यादि विदेशस्थसपिंडमरणं श्रूयते तदा यावद्वशिष्टमशौचकालस्य तावदाशौचं कर्तव्यं यदि तु संपूर्णाशौचस्य काले ऽतीते षण्मासाभ्यंतरे सपिंडमरणं श्रूयते तदा त्रिरात्रं तदूर्ध्वं नवममासपर्यंतं पाक्षिणी तदूर्ध्वं वर्षं यावदेकमहोरात्रमशौचं । वर्षानंतरं स्नानमुदकदानं च त्र्यहाशौचादावतीते सर्वदेव स्नानोदकदानमात्रम् । जननाशौचकाले त्वतीते जननश्रवणे सर्वदा अशौचाभावः । अत्र पित्रादीनां विदेशस्थानां मरणश्रवणे मिताक्षराहारलताभ्यां विशेषो लक्षितः स तु रत्नाकरादिभिरलिखितत्वादपेक्षितः । महानद्यादिव्यवहिते देशांतरमृतस्य मरणश्रवणे सद्यःशौचम् । यथा च पैठीनसिः । देशांतरमृतस्य सद्यःशौचम् । अत्र देशांतरं परिभाषितं । अत्र बृहस्पतिः देशांतरं वदंत्येके शतयोजनमायतम् । चत्वारिंशद्वदंत्येके त्रिंशदेके तथैव च । वृद्धमनुरप्याह । वाचो यत्र विभिद्यंते गिरिर्वा व्यवधायकः । महानद्यंतरं यच्च तद्देशांतरमुच्यते । देशनामनदीभेदसन्निकटे तु भवेत्तु यत् । तत्तु देशांतरं प्रोक्तं स्वयमेव स्वयंभुवा ॥ दशरात्रेण या वार्ता यत्र न श्रूयते ऽथवा । अत्रैषां कल्पेष्वननुगत्यानध्यवसायस्तस्माद्व्यवस्थोच्यते ॥ अत्रोत्सर्गस्तावत्षष्टियोजनानंतरं । यत्तु चत्वारिंशद्योजनानंतरस्य त्रिंशद्योजनानंतरस्य च देशांतरत्वमुक्तं तद्भाषाभेदे ऽपि गिर्यादिव्यवधाने सति योजननियमाभावं दर्शयितुं । तेनायमर्थः । षष्टियोजनाभ्यंतरे ऽपि यत्र भाषाभेदो गिरिमहानदीव्यवधानं चास्ति तत्र तावतैव देशांतरत्वं न तु योजनापेक्षा । एतद्विषय एव वृद्धमनुवचनम् । तच्च स्वयमेव विवृणोतिस्म देशनामनदीभेदादित्यादिना । गिर्यादिव्यवधानाभावे तु नियमार्थमाह दशरात्रेणेत्यादि । तेन गिर्यादिव्यवधानाभावे यत्र स्यवार्तां दशाहाभ्यंतरे न श्रूयते तद्देशांतरम् । एतदपि पुरुषशक्त्यपेक्षया व्यवस्थितमतः षष्टियोजनांतरोपलक्षकमेव तावद्देशस्य

शाह्नेनोत्समंतः पुरुषेणगंतुमशक्यत्वात् । अतएवगिर्यादिसमुदायव्यवधानाभावेपिशतद्वयषष्टियोजनानंतरेप्रयाणेमृतस्यतीरभुक्तिदेश
स्थितंप्रतिदेशांतरमृतत्वव्यवहारः । गिरिर्वेतिवाशब्दःसमुच्चये । ततश्चायमर्थः । षष्टियोजनानंतरोदेशोदेशांतरंषष्टियोजनाभ्यंतरे
पियत्रभाषाभेदगिरिनदीव्यवधानानिभवंतितदपिदेशांतरम् । तस्मिन्देशांतरेमृतस्यसद्यःशौचम् । अथबालाद्यशौचम् । तत्रयाज्ञव
ल्क्यः । आदंतजननात्सद्यआचूडंनैशिकीस्मृता । त्रिरात्रिमाव्रतादेशाद्दशरात्रमतःपरं । नैशिकीअशुद्धिः । अहोरात्रमशौचमित्यर्थः ।
अत्रदंतजननशब्देनदंतजन्मकालोलक्ष्यते । सचसप्तमोमासः । दंतजन्मसप्तमेमासीत्युपनिषद्दर्शनात् । चूडाशब्देनापि
चूडाकालोलक्ष्यते । सचतृतीयंवर्षंतृतीयेवाअप्रतिहतइतिचूडाविधानात् । अत्रयद्यपिसांवत्सरिकस्यचूडाकरणमिति । प्रथमवर्षेवि
धानमप्यास्ति । तथापि विप्रेन्यूनेत्रिभिर्वर्षैरित्यादिवाक्येनाद्वितीयवर्षसमाप्तियावत्तन्नैशिकीविधानात्तदेकवाक्यतयातृतीयाएवगृ
ह्यते । चूडाकालऔत्सर्गिकस्तृतीयाब्दः । प्रथमाब्देतुकुलधर्मवशादपवादतश्चूडाकरणमितिहारलता । व्रतंउपनयनेनापित्वकाल
उपलक्ष्यते । सचषड्वर्षानंतरएवपर्यवसितः । तच्चब्रह्मपुराणे । द्विजन्मनामयंकालस्त्रयाणांतुषडाब्दिकं इतिसुव्यक्तमेव । मर्या
दायांचात्राङ् । तेनसप्तममासमेवाधिकृत्यबालमरणेसद्यःशौचं । सप्तममासमारभ्यद्वितीयवर्षसमाप्तियावदेकाहोरात्रम् । ततःषष्ठवर्षंव्याप्य
त्रिरात्रम् । तदनंतरंदशरात्रादिकंस्वस्वजात्युक्तंब्राह्मणादीनांत्रयाणांशूद्राणांविशेषोभविष्यति । अत्रोपनयनेनकालव्यवस्थापनात्
बालस्यपुंस्त्वंविवक्षितंतेनकन्यानां मरणेनेदमशौचं । तत्रविशेषोवक्ष्यते पारस्करेण । अंतःसूतकेचेदाजननाशौचमध्येबालमरणेसूतक
उत्थानादाशौचंमृतवत्तत्रोक्तंकर्म । अस्यार्थः । अंतःसूतकेसूतकाभ्यंतरेचेद्बालोविपद्यतेतदाआउत्थानाद्दशमादिनंयावदशौचं

भवति इदंचआउत्थानादित्यभिधानान्मातुरेव । अन्येषांतुपूर्वोक्तंसद्यःशौचमेव ॥ अपत्यमात्रमरणंचेहविवक्षितंशेषानुपस्थापनात् । नि
अंगिराः । विप्रेन्यूनेत्रिभिर्वर्षैर्मृतेशुद्धिस्तुनैशिकी । द्व्यहेनक्षत्रियेशुद्धिस्त्रिभिर्वैश्येमृतेसति । निर्वृत्तचूडकेविप्रेत्रिरात्राच्छुद्धिरिष्यते । नि
वृत्तेक्षत्रियेषड्भिर्वैश्येनवभिरेवच । त्रिभिर्वर्षैर्न्यूनइत्यत्रत्रिभिर्वर्षैरुपलक्षितात्न्यूनेसंपूर्णद्विवर्षइत्यर्थः निर्वृत्तचूडकइति । निर्वृत्ता
चूडाविहितायस्येतिनिर्वृत्तचूडकः । शेषंसुबोधं । ब्रह्मपुराणे । अनुपनीतोविप्रस्तुराजाचैवधनुर्ग्रहात् । अगृहीतप्रतोदस्तुवैश्यः
शूद्रःस्ववस्त्रयुक् । म्रियेतयत्रतत्रस्यादशौचंत्र्यहमेवहि । द्विजन्मनामयंकालःक्षत्रियाणांतुषडाह्निकः । पंचाह्निकस्तुशूद्राणांस्वजात्युक्तम
तःपरं । अत्रक्षत्रियवैश्ययोः षडब्दाभ्यंतरेत्रिरात्राभिधानंवेदाग्निमतोरेव । अन्येषांषडहनवाहौपूर्वोक्तौ एवमेवहारलताकारः । शूद्रस्यापिपं
चाब्दाभ्यंतरेत्रिरात्राभिधानंसच्छूद्रविषयम् । इत्थमेवहारलतारत्नाकरौ । सच्छूद्रास्तुविशेषाशौचेपूर्वंदर्शिताः । यदपिअनूढानांतुकन्यानां
तथावैशूद्रजन्मनामितिशूद्रस्यत्रिरात्राभिधानंतदपिसच्छूद्रविषयमेव । सामान्यस्तुशूद्राणामंगिरोवाक्येनैवव्यवस्था । तद्यथा । शूद्रेद्विव
र्षान्न्यूनेतुमृतेशुद्धिस्तुपंचभिः । अतऊर्ध्वंमृतेशूद्रेद्वादशाहोविधीयते । षड्वर्षातमतीतस्तुशूद्रःसम्रियतेयदि । मासिकंतुभवेच्छौचमित्यांगि
रसभाषितम् । एतंतत्षड्वर्षोपरिमासिकाशौचविधानंविवाहितशूद्रविषयम् । अविवाहितस्यषोडशवर्षयावद्द्वादशाहस्तदनंतरंमासिकमेवा
शौचम् । तथाचशंखः । अनूढभार्यः शूद्रस्तुषोडशाद्वत्सरात्परं । मृत्युंसमधिगच्छेच्चेन्मासितस्यापिबांधवाः । शुद्धिंसमधिगच्छंतिनात्रकार्याविचारणा । तदेवमासमस्ताखंडककीयव्यवस्था । ब्राह्मणानांसप्तममासात्प्राक्बालकेमृतेसद्यःशौचंसप्तममासादारभ्यद्वितीयवर्षसमाप्तिंयावत्
एकमहोरात्रमशौचं । तृतीयवर्षादारभ्यषड्वर्षांतंयावत् त्रिरात्रं । तदुपरिदशाहमशौचंभवति । क्षत्रियाणांसप्तममासात्प्राक्सद्यः शौचम् । तदनं

तदंद्वितीयवर्षांतंयावद्व्यहम् । द्वितीयवर्षादारभ्यपड्वर्षांतंयावत्षडहः । तदुपरिद्वादशाहमशौचंभवति । वैश्यानांसप्तममासात्प्राक्सद्यः शौचं
तदनंतरंद्वितीयवर्षांतंयावत्त्र्यहम् । तदुपरिषड्वर्षांतंयावन्नवाहम् । तदुपरिपंचदशाहंशौचंभवति । शूद्राणांसप्तममासात्प्राक्सद्यःशौचम् ।
सप्तममासादारभ्यद्वितीयवर्षसमाप्तियावत्पंचाहम् । तृतीयवर्षादारभ्यषोडशवर्षंयावत् अविवाहितमृतेद्वादशाहम् । तदुपरिमासमशौचं
भवति । विवाहितेषड्वर्षादेवोपरिमृतेमासमशौचंभवतितेषांशूद्राणांद्विजोच्छिष्टभोजनंद्विजशुश्रूषामासिमुंडनंचतेसच्छूद्राः । तेषां
सप्तममासादारभ्यपंचवर्षंयावन्मृतेबालेत्रिरात्रम् । तदुपरिषोडशवर्षाणियावदविवाहितमृतेद्वादशाहम् । तदुपरिपंचदशाहमशौचं ।
विवाहिताविवाहितेसाधारणम् । प्रसूतिकानांतुसर्वासामेवदशाहाभ्यंतरेबालमरणेयावद्दशाहं पूर्यतेतावदशौचंभवति । अत्रसर्ववर्णा
नामसंपूर्णद्विवर्षोबालोमृतोभूमौनिखननीयः । अग्निदानंतस्यनकर्तव्यं । यदितुप्रमादादिनातस्याग्निदाहः क्रियतेतदाब्राह्मणानांत्रिरात्रं
क्षत्रियाणामेवदशाहं । वैश्यानांद्वादशाहं । शूद्राणांविंशत्रिरात्रमशौचंभवति । तथाचब्रह्मपुराणे । अनतीतद्विवर्षस्तुप्रेतोयत्रापिदह्यते ।
अतिमोहाभिभूतैश्च देशधर्म्यमार्दवात् । अशौचंब्राह्मणानांतुत्रिरात्रंतत्रविद्यते । राज्ञामेकादशाहंतुवैश्यानांद्वादशाह्निकम् । अपिविंशति
रात्रंतुशूद्राणांभवतिक्रमात् ॥ अथत्र्यहशौचं । ब्रह्मपुराणे । आजन्मनस्तुचूडांतंयत्रकन्याविपद्यते । सद्यःशौचंभवेत्तत्रसर्ववर्णेषुनित्यशः ।
ततोवाग्दानपर्यंतंयावदेकाहमेवहि । अतःपरंप्रवृद्धानांत्रिरात्रमितिनिश्चयः । वाक्प्रदानेकृतेतत्रज्ञेयंचोभयतस्त्र्यहं । पितुर्वरस्यचततोदत्ता
नांभर्तुरेवहि । स्वजात्युक्तमशौचंस्यात्सूतकेमृतकेपिवा । अतःपरमकृतवाग्दानावस्थातः परंप्रवृद्धानांप्राप्ताधिकरूपाणामित्यर्थः । अधिरू
[illegible]करोतिवाक्प्रदानेकृतइति । उभयतइतिव्याकरोतिपितुर्वरस्यचेति । वरस्यभर्तुरित्यर्थः । ततोदत्तानांविधिपूर्वंदत्तानांभर्तुरेव

स्वकात्युक्तमशौचंभंवतीत्यर्थः । एवमेवहारलता । यत्रतुवाग्दानंनभवतितत्रचूडानंतरंविवाहपर्यंतमेकाहमेवाशौचंभवतीत्यर्थः । तथाचया
ज्ञवल्क्यः । अहस्त्वदत्तकन्यासुबालेषुचविशोधनं । अस्यार्थः । अदत्तकन्यासुमृतासुबालेषुचजातदंतेषुमृतेषु अहरेकमहोरात्रमशौचंभ
वति । अयमत्रसमुदायार्थः । सर्ववर्णानांद्वितीयवर्षांतंयावत्कन्यामरणेसद्यःशौचं । तदनंतरंविवाहपर्यंतमेकाहोरात्रमशौचं विवाहानंतरं
पितृकुलेऽशौचंनभवति । स्वामिकुलेसंपूर्णाशौचंभवति । यत्रतुयातुभ्यमेषादातव्येतिवाग्दानंक्रियतेतत्रचूडानंतरंमृतायांतस्यांविवाह
पर्यंतंपितृपतिपक्षयोर्द्वयोरपित्रिरात्रमितिविशेषः । विवाहितासुविशेषमाह । ब्रह्मपुराणे । दत्तानारीपितुर्गेहेसूयतेम्रियतेऽथवा ॥ स्वयंशौचं
चरेत्सम्यक्पृथक्स्थानेव्यवस्थिता ॥ तद्बंधुवर्गस्त्वेकेनशुध्यतेजनकस्त्रिभिः ॥ अत्रजनकस्त्रिभिरितिजनकशब्देनजननकर्तृत्वोपलक्षणा
ज्जनन्याअपित्रिरात्रेणशुद्धिः । तथाहि । सिद्धवत्पारिजातरत्नाकरयोर्मातापित्रोस्त्रिरात्रमित्युक्तं । हारलताकारेणापितथैवहेतुपूर्वकमत्रोक्तं
बंधुवर्गइत्यत्रापिवर्गशब्देनएकक्रियापन्नाएकाश्रमस्थाभ्रातृवैमात्रेयपितृव्यतत्पुत्रास्तेषांपुत्राश्चगृह्यंते तेषामेकमहः । अतएवसिद्धवत्पा
रिजातहारलतारत्नाकरेषु भ्रात्रादीनामेकाहइत्युक्तं । पितुर्गेहेइति सनाभिगृहोपलक्षणं । निजगृहेऽसपिंडमरणेपितत्रतत्राशौचश्रवणाद
त्रापिभ्रात्रादिगृहेमरणमपिविवक्षितं । मरणसाहचर्यादत्रजननमपितादृग्लभ्यते । एतच्चपारिजातस्यानुमतमेव । तथाहि । तेननिजव्याख्याने
विशेषमनभिधायपितृगृहइतिपितृशब्दस्यविवक्षितत्वात् । भ्रात्रादिगृहेनिवसंत्याःप्रसवेमरणेचसत्यशौचंनभवतीतिप्रकाशकारइत्युक्त
मतःप्रकाशकारस्यमतमेतत् । ममतुमतेपितृशब्दस्याविवक्षितत्वं । किंत्वशौचभागिगृहंविवक्षितमितितस्यार्थोवगम्यते । विशेषानभिधा
नात् । रत्नाकरस्वरसोप्येवंलक्ष्यतइतितदियमत्रव्यवस्था । विवाहितास्त्रीयदिपितृगृहेसूयतेम्रियतेवातदामातापित्रोस्त्रिरात्रमशौचं । एका

श्रमवासिनांभ्रातृवैमात्रेयपितृव्यपुत्राणांतत्पुत्राणांपितृव्यस्यचैकरात्रं । पितुर्भिन्नाश्रमवासिनांभ्रात्रादीनामशौचंन भवतिपितुरभावेमातृ
गृहेदुहितुर्मरणेप्रसवेवामातुस्त्रिरात्रमेवमातुरभावेभ्रातृगृहेभगिन्याःप्रसवेमरणेवाभ्रात्रादीनामेकरात्रमेवाशौचंभवति । तथा । पित्रादत्तातु
याकन्यास्वातंत्र्यादन्यमाश्रिता । यंयंश्रितवती भूयस्तस्याशौचंत्र्यहंत्र्यहं । मृतायांवाप्रसूतायांनान्येषामितिनिश्चयः । कामादक्षत
योनिश्चेदन्यंभार्याप्यवस्थिता । तस्यान्यस्यसगोत्रासामत्वाश्रितवतीस्वयं । अस्यार्थः । विवाहितास्त्रीपाणिग्राहकादन्यंपुरुष
माश्रयति । तस्यैवपुरुषस्यतस्यांमृतायांप्रसूतायांवात्रिरात्रमशौचंभवति । स्वयंग्राहककुलजानामशौचंतत्रनभवति । यदिचपा
णिग्राहकेणतस्याः संगमः कृतस्तदातस्याः पाणिग्राहकगोत्रमेवातिष्ठतिस्वयंग्राहकगोत्रंनभवति । यदितस्यास्तत्संगमोनवृत्तस्तदायमे
वाश्रितवतीभवतितस्यैवान्यस्यान्यगोत्रस्यसगोत्रासाभवति । अशौचंतत्रापित्र्यहमेव । तथा । पदेतुसप्तमेयत्रबलात्काचिद्धृताभवेत् ।
स्वामिगोत्रंभवेत्तस्यास्तच्च भूयोविशिष्यते । पितृकंत्वप्रसूतायांततः पौर्विकभर्तृकं । अस्यार्थः । पाणिग्रहणेवृत्तेऽसमाप्तेसप्तपदीसमारो
हणे याबलात्हृताअन्यमाश्रिताभवतितस्याः स्वामिगोत्रं पाणिग्राहकगोत्रमेवभवति । तत्रापिविशेषमाह । तच्च भूयोविशिष्यते ।
भूयःपुनस्तद्गोत्रंविशिष्यते विभज्यतेइत्यर्थः । विभागमाह पैतृकंत्वप्रसूतायामित्यादि । तस्यबलात्कारहृतायायावत्प्रसवोनभव
तितावत्पितृगोत्रमेवावतिष्ठते । प्रसवानंतरंपौर्विकस्यभर्तुः पाणिग्राहकस्यैवगोत्रमवतिष्ठते । बलात्कारहर्तुर्गोत्रंकदापिनभवतितस्याश
तिभर्त्रशौचेतत्प्रसवमरणयोस्त्रिरात्रमेवहर्तुरिति । शंखः । पितृवेश्मनियानारीरजः पश्यत्यसंस्कृता । प्रसवेमरणेतच्चमशौचंनोपशाम्यति ।
पितुरितिशेषः । इतिरूपशौचं । अथगर्भस्रावाशौचं । ब्रह्मपुराणे । षण्मासाभ्यंतरेयावद्गर्भस्रावोभवेद्यादि । तदामाससमैस्तासांदिवसैःशुद्धिरि

ष्यते । अतऊर्ध्वंस्वजात्युक्तमशौचंतासुविद्यते । सद्यःशौचंसपिंडानांगर्भस्यपतनेसति । अत्रदिवसैरितिबहुत्वश्रवणान्मासानांबहुत्वंयतः
प्रभृतिसंभवति । तत्रेयंव्यवस्था । तेनतृतीयमासोपरिषण्मासपर्यंतंयावंतोमासाअतीतास्तावंतिदिनानितासांस्त्रीणांब्राह्मण्यादीनामशौ
चंभवति । सपिंडानांस्वामिपुत्रप्रभृतीनांसद्यःशौचं । मासत्रयाभ्यंतरेविशेषमाह । मरीचिः । गर्भस्रुत्यांयथामासमचिरेतूत्तमेत्र्यहं । राजन्ये
तुचतूरात्रंवैश्येपंचाहमेवच । अष्टाहेनतुशूद्रस्यशुद्धिरेषाप्रकीर्तिता । यथामासमिति । यावंतोमासाअतीतास्तावंतिदिनान्यव्याप्याशौचं
एतच्चमासत्रयादूर्ध्वंषण्मासंयावत् । मासत्रयाभ्यंतरेत्वाहअचिरेतूत्तमेत्र्यहमिति । अचिरेमासत्रयाभ्यंतरेगर्भस्रावेसति उत्तमेउत्तमजातीये
ब्राह्मण्यांत्रिरात्रं । क्षत्रियाणांचतूरात्रं वैश्यानांपंचाहं शूद्राणामष्टाहमशौचंभवतीत्यर्थः कूर्मपुराणे । गर्भच्युतावहोरात्रंसपिंडेसतिनिर्गु
णे यथेच्छाचरणेज्ञातौत्रिरात्रमितिनिश्चयः । अत्यंतनिर्गुणेइति वेदैकदेशवेदांगस्वाक्रियाशून्येएकाहः यथेच्छाचरणेसर्वाशित्वसर्वविक्र
यित्वादौसतित्रिरात्रं । एवमेवहारलता । यदपित्रिरात्राशौचंहारीतेनोक्तंजातमृतेमृतजातेवाकुलस्येतितदपियथेच्छाचरणेज्ञातिविषयमेव
एवमेवरत्नाकरः । जातमृतइतिजन्मानंतरमव्यवहितकालमृतइत्यर्थः । तदूर्ध्वंजातमरणेसर्वेषामेवसपिंडानांसद्यःशौचं । एवंचगर्भस्रावेसपि
डानांगुणवतांसद्यःशौचंतदेषसमुदायार्थः । गर्भस्रावेमासत्रयाभ्यंतरेब्राह्मण्यास्त्रिरात्रं मासत्रयोपरिषण्मासंयावत् । यावत्सुमासेष्वतीते
तेषुगर्भस्रावोभवतितावंत्येवदिनान्यशौचं । षण्मासोपरिदशाहमशौचंभवति । पतिपुत्रादिसपिंडानांसद्यःशौचंभवति । क्षत्रियायामास
त्रयाभ्यंतरेदिनचतुष्टयं । वैश्यायाः पंचाहं तदुपरिषण्मासंयावत् । उभयोरपिअतीतमाससमसंख्यानिदिनानि । तदुपरिस्वजात्यु
क्तद्वादशाहंचदशाहंवाशौचांशौचंभवति । शूद्रायामासत्रयंयावदष्टाहं । ततःषण्मासंयावदतीतमाससमसंख्यानिदिनानि । तदुपरिमासम

शौचंभवति । अत्रसर्वत्रानिर्गुणसपिंडानामेकाहं । यथेच्छाचरणानांसपिंडानांमहाशौचंविज्ञेयं । अथमृत्युविशेषाशौचंप्रारभ्यते । वृद्धगार्ग्यः ।
वृद्धःशौचंस्मृतेर्लुप्तः प्रत्याख्यातभिषक्क्रियः । आत्मानंघातयेद्यस्तुभृग्वग्न्यनशनांबुभिः । तस्यत्रिरात्रमशौचंद्वितीयेत्वस्थिसंचयः । तृती
येतूदकंकृत्वाचतुर्थे श्राद्धमाचरेत् । अत्रशौचतोलुप्तइतियोवृद्धोमूत्रोच्चारादिशौचंकर्तुंनशक्नोति । अनुभूतार्थस्याचिरेणैवस्मृतिशून्यः ।
एवंविधोभृगुप्रपातादिभिरात्मानंघातयेत् । भिषजावैद्येनाप्रतिक्रियरोगश्चपुरुषआत्मानंघातयेत् तत्रात्मघातेदोषाभावः त्रिरात्राशौचा
चरणंतयोःकर्तव्यमित्यर्थः । ब्रह्मपुराणे । दुश्चिकित्स्यैर्महारोगैःपीडितस्तुपुमानपि । प्रविशेज्ज्वलनंदीप्तंकरोत्यनशनंतथा । अगा
धतोयराशिंचभृगोः पतनमेवच । भृगोः पर्वतादित्यर्थः । गच्छेन्महापथंवापितुषारगिरिमादरात् । प्रयागवटशाखाग्राद्देहत्यागंकरो
तियः । स्वयंदेहविनाशेतुप्राप्तेकालेमहामतिः । उत्तमान्प्राप्नुयाल्लोकान्नात्मघातीभवेत्क्वचित् । महापापक्रियःस्वर्गेदिव्याँल्लोकान्समश्नुते ।
एतेषामधिकारस्तुतपसांसर्वजंतुषु । नराणामथनारीणांसर्ववर्णेषुसर्वदा । ईदृशंमृतकंयेषांजीवताकुत्राचिद्भवेत् । अशौचंस्यात्त्र्यहंतेषांव
ज्रानलहतेतथा । महामतिरितिस्वयंदेहविनाशेउपस्थिते । अन्यथापिरोगेणसंप्रत्येवमर्तव्यमतःसात्विकतयास्वयमेवैतेषुस्थानेषुदेहंत्यजा
मीतिकृतबुद्धिः । महापापक्रियइति । महापापक्रियोपीत्यर्थः । तेनमहापापक्रियोप्येवंकृतमरणोदिव्याँल्लोकान्समश्नुते । किमुतधार्मि
कइत्यतिशयप्रदर्शनं । एतेषांमरणरूपाणांतपसांसर्ववर्णव्यक्तिसाधारणेऽधिकारः । ईदृशमित्यादेरयमर्थः । एवंविधमरणप्रवृत्तानांदैववशा
त्कालेजीवतांकालांतरेमृतानांत्रिरात्रमेवाशौचं । तत्कालमरणेत्रिरात्रमित्यविवादमेव । वज्रानलहतेतथेतिएतदप्येवंविधेषुप्रायश्चित्तेषुव
ज्रानलहतेषुत्रिरात्रमितिदर्शयति । प्रायश्चित्तइतितुकश्यपवाक्येकवाक्यतयालभ्यते । अंगिराः । व्यापादयेदथात्मानंस्वयंयोग्न्युदकादि

ना । विदितंतस्यनाशौचंनाग्निर्नाप्युदकक्रिया । यस्तुरोषादिनाहेतुनाअग्न्यादिभिरात्मानंघातयतितस्याशौचाग्निदानादिक्रियानकर्तव्या ॥ अथकश्चित्प्रमादेनम्रियतेग्न्युदकादिषु । तस्याशौचंविधातव्यंकार्याचास्योदकक्रिया । प्रमादेनानवधानेनाग्न्युदकवज्राद्यपमृत्युहेतुभिर्म्रियतेतस्यसंपूर्णमशौचंकर्तव्यं । संकोचेप्रमाणाभावात् उदकक्रियाकर्तव्या । आग्निसंस्कारोदकदानादिकाःकर्तव्या इत्यर्थः । उदकक्रियेत्यस्योपलक्षकत्वात् ॥ तदेवमत्रसमुदायार्थः । शौचाचमनाद्यसमर्थस्यवृद्धस्यअसाध्यव्याधिगृहीतस्यचपुरुषस्यमरणेच्छायामग्निजलप्रवेशेनमरणेसपिंडानांत्रिरात्रमशौचं । तत्कालेऽग्न्यादिप्रवेशेपिअमृतानांपश्चान्मृतानांत्रिरात्रमशौचं । रोषादिनायेजलादिष्वात्मानंघातयंतितेषामग्निदाहादिकंनकर्तव्यं । तन्मरणनिमित्तकशौचमपिनकर्तव्यं । प्रमादेनाग्न्युदकवज्रादिनामरणे संपूर्णमशौचमग्निसंस्कारादिकाश्चक्रियाःकर्तव्याः । सद्यःशौचानुवृत्तोयमः । डिंबाहवहतानांचविद्युतापार्थिवेनच । गोब्राह्मणस्यचैवार्थेयस्यचेच्छतिपार्थिवः । डिंबः शस्त्रंविनाकलहः । संमर्दोवा आहवः संग्रामः । विद्युतावज्रानलेन । इदंचवज्रानलमरणेसद्यःशौचाभिधानं मरणांतिकेप्रायश्चित्तेमवृतस्यमरणेज्ञेयं । पार्थिवोराजत्वेनप्रसिद्धोनक्षत्रियएवेतिरत्नाकरः । गोब्राह्मणस्यचैवार्थेयुद्धादन्यत्रापिजलपंकोद्धारादौमृतानांसद्यःशौचं । यस्यचेच्छतिपार्थिवः । यस्यप्रेष्यस्यस्वकार्यतयाकदाचित्पृथिवीपतिः सद्यःशौचमिच्छति । आहवइतियदुक्तंतत्रविशेषमाहुः । उद्यतैराहवेशस्त्रैःक्षत्रधर्महतस्यच । सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्मृतम् । सद्यःशौचमितियोजनम् । क्षत्रधर्मोऽलंकारत्वादिः । शस्त्रैर्विषादिदिग्धैः । यज्ञःपिंडदानादिरूपः । संतिष्ठतेसमाप्तिमेति । सद्यएवेत्यर्थः ॥ पराशरः ॥ ब्राह्मणार्थेविपन्नानांदंडिनांगोग्रहेषुच । आहवेषुविपन्नानामेकरात्रमशौचकम् । अत्रदंडिनामितित्रिष्वपिसंबध्यते । ततश्चायमर्थः । गोब्राह्मणार्थेगोग्रहे

युद्धेचदंडेनमृतानामेकाहोरात्रमशौचम् । एवमेवहारलता । अत्रदंडिनामित्यत्रबंदिनामितिरत्नाकरेपाठः । बंदिनांचौरादिगृहीतानांत
दशायामेवमरणेएकरात्रमशौचमितिव्याख्यातम् । बृहस्पतिः । डिंबाहवेविद्युताचराज्ञागोविप्रपालने । सद्यःशौचहतस्याहुस्त्र्यहंचान्ये
महर्षयः । अत्रशस्त्रैरभिमुखहतस्यसद्यःशौचम् । लगुडादिनापरांमुखहतस्यत्रिरात्रमितिव्यवस्थितविकल्पार्थश्चकारः । यमः ।
डिंबाशनिहतानांचतथैवप्राणसत्रिणाम् ॥ नदीश्वापददंष्ट्रिभ्यःसद्यःशौचंविधीयते ॥ प्राणसत्रिणामितिपरार्थंप्राणत्यागिनामित्यर्थः
नदीतिजलाश्रयोपलक्षणम् । श्वापदानखायुधास्तरक्षुऋक्षादयःदंष्ट्रिणोदशनायुधाःसर्पवराहादयः एतन्नद्यादिमरणेसद्यःशौचं । मर
णांतिकेप्रायाश्चित्तेकाम्येचत्रिवेणीसंगमादौमरणेसद्यःशौचानुवृत्तौशंखलिखितौ । अथशस्त्रानाशकाग्निरज्जुभृगुजलप्रमापणेष्वेवमेव
अनाशकमभोजनम् । एतदपिसद्यःशौचंकाम्येप्रयागादौशस्त्रादिनामरणेप्रायश्चित्तेमरणांतिकेज्ञेयम् तदयंसद्यःशौचादिबोधकसम
स्तांसंकलकार्थः । संमर्दहतानांशस्त्रशून्यकलहमृतानांराज्ञाहतानांगोब्राह्मणार्थंजलपंकादिमग्नानांसंग्रामेशस्त्रसंमुखहतानांमरणांति
केकाम्येकर्मणिप्रयागादौप्रायश्चित्तेचशस्त्रजलाग्निश्वापदादिभिर्मृतानांचसद्यःशौचम् । सकलस्यापिराजाज्ञयासद्यःशौचं । ब्राह्मणार्थे
गवार्थेचदंडेनविपन्नानांसंग्रामेचदंडेनविपन्नानांबंदीकृतानांमृतानामेकाहोरात्रमशौचं । लगुडसंग्रामेपराङ्मुखहतस्यात्रिरात्रमशौचं ।
पराशरः । उपसर्गेमृतेचैवसद्यःशौचंविधीयते । एतच्चप्रचुरोपसर्गोपद्रवसन्नियतविषयमितिभाति । उपसर्गमरणसंपूर्णाशौचस्याप्रामाणि
कव्यवहारविषयत्वात् । तथाच । आपद्यपिचकष्टायामित्यत्रसद्यःशौचेऽत्यंतदुर्भिक्षेऔपसर्गिकात्यंतमरणादिपीडायांनाशौचमि
तिहारलताकारआहस्म । तथाचदक्षः ॥ स्वस्थेकालेत्विदंसर्वंसूतकंपरिकीर्तितम् । आपद्गतस्यसर्वस्यसूतकेपिनसूतकम् ।

यत्तूपसृज्यतइत्युपसर्गइत्यबहिर्भूतोपसर्गमरणेसत्त्रः शौचंव्रणपाकपरंपरयामरणेसंपूर्णाशौचमिति । व्याख्यातंकेश्चित् । तन्मतेऽबहि
र्भावेउपसर्गस्याज्ञानमबहिर्भावेचव्रणपाकपूर्वावस्थायांमरणेऽनध्यवसायएवस्यादितितद्विभावनीयम् । अथसापिंडाद्यशौचम् । तत्रबृह
स्पतिः । दशाहेनसापिंडास्तुशुध्यंतिप्रेतसूतके । त्रिरात्रेणसकुल्यास्तुस्नात्वाशुध्यंतिगोत्रजाः । सपिंडाः सप्तपुरुषावधयः स्ववंश्याः सकुल्या
दशपुरुषावधयः । तदूर्ध्वंगोत्रजाः । प्रेतसूतकेप्रेतेसूतकेचेत्यर्थः मनुः । गुरोः प्रेतस्यशिष्यस्तुपितृमेधंसमाचरेत् । प्रेतहारैः समंतत्र
दशरात्रेणशुध्यति । अस्यार्थः यः शिष्योवेदाध्येतागुरुकुलेतिष्ठन्गुरोः संस्कारंकरोति । सदशरात्रेणशुध्यति । गुरुलक्षणमाह । अल्पंवाबहु
वायस्यश्रुतस्योपकरोतियः । तमपीहगुरुंविद्यादिति । श्रुतस्याध्ययनंतस्यवेदविषयस्योपकरोतीत्यर्थः । त्र्यहमित्यनुवृत्तौगौतमः । आचा
र्यतत्पुत्रस्त्रीयाज्यशिष्येषुचैवमिति । आचार्य्यउपनयनपूर्वकसांगवेदाध्यापकस्तस्मिन्तत्पुत्रेचमृतेतत्पत्न्यांचमृतायांशिष्यस्यात्रिरात्रम
शौचं । ज्योतिष्टोमादियागंकुर्वंतोयस्यसर्वदाआर्त्विज्यंक्रियतेसयाज्यः तस्मिन्मृतेसतिऋत्विजांत्रिरात्रमशौचंशिष्यस्योपनीयसांगवेदम
ध्यापितस्यगुरुकुलस्थितस्यैवमरणेआचार्य्यस्यत्रिरात्रमशौचम् । मनुः । त्रिरात्रमाहुराशौचमाचार्य्येसंस्थितेसति । तस्यपुत्रेचप
त्न्यांचदिवारात्रमितिस्थितम् । दिवारात्रमहोरात्रमित्यर्थः । एतच्चाहोरात्रंशौचंशिष्यस्यानिवृत्ताध्ययनस्याचार्य्यपत्नीपुत्रयोरपिमरणे
ज्ञेयम् । अधीयानस्यतुतयोरपिमरणेत्रिरात्रंगौतमोक्तं । बृहस्पतिः । त्र्यहंमातामहाचार्य्यश्रोत्रियेष्वशुचिर्नरः । मातुलेपक्षिणीरात्रिःशिष्य
र्त्विग्बांधवेषुच । अश्रोत्रियेत्वहःकृत्स्नमनूचानेतथागुरौ । मृतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितिः ॥ श्रोत्रियएकशाखाध्येता । ए
कांशाखामधीत्यश्रोत्रियइतिबौधायनवचनात् । तस्मिन्स्वगृहेमृतेस्वगृहपतेस्त्रिरात्रमशौचम् । तथांगिराः । गृहेयस्यमृतःकश्चिदसपिं

ङः कथंचन । तस्याप्यशौचंविज्ञेयंत्रिरात्रमितिनिश्चयः अत्रासपिंडः श्रोत्रियः अश्रोत्रियेत्वसपिंडेस्ववेश्मनिमृतेएकाहोरात्रम् .। तथाचैक
रात्रमित्यनुवृत्तौ विष्णुः । असपिंडेस्ववेश्मनिमृतइति अत्रासापिण्डोऽश्रोत्रियः । मातुलेपक्षिणीति मातुः सहोदरेभ्रातरि शिष्येऽपिगु
रुकुलान्निवृत्ताध्ययनेमृतेपाक्षिणीतिकृत्वाउपनीयवेदैकदेशमध्यापितेऽनुपनीयसंपूर्णवेदमध्यापिते च स्वगृहे मृते शिष्ये चाचार्यस्य पक्षिणी
ऋत्विजिमृतेयजमानस्यपाक्षिणीबांधवोमातृष्वस्रेयादिरग्रेवक्ष्यतेतन्मरणेपिपाक्षिणी । पक्षिणीतुपूर्वापरादिनसहितारात्रिः पूर्वापररात्रिसहितं
दिनंवा । अश्रोत्रियइत्यादि । अश्रोत्रियेचस्वगृहेमृतेऽहः कृत्स्नमहोरात्रंव्याप्यअनूचानः सांगवेदाध्येता तस्मिन्नेकग्रामेमृतेगुरौअल्पा
ध्यापकेमृतेएकमहोरात्रम् । एवमेवहारलता । मृतेराजनिस्वतंत्रेतद्देशाधिपेसज्योतिः । दिवामरणेदिनमात्रंरात्रौमरणेरात्रिमात्रमशौचंप्रजाना
मित्यर्थः । गौतमः । पक्षिणीमसपिंडेयोनिसंबन्धेसहाध्यायिनि असपिंडेसमानोदकेदशमपुरुषादूर्ध्वंज्ञायमानजन्मनामिकेमृतेपक्षिणी
सहाध्यायिनिचएकस्माद्गुरोः सहवेदमधीयानएवविनष्टेपाक्षिणी । अन्यत्रैकाहः । योनिसंबंधेमृतेपाक्षिणी । योनिसंबंधाश्चमातृष्वसृपितृष्वसृ
मातुलमातुलानीमातुलपुत्रमातृष्वस्रेयपैतृष्वस्रेयदौहित्रभागिनीभागिनेयाः श्वश्रूश्वशुरौ च तथाचयमइत्यनुवर्त्यमिताक्षराकारः । श्वशुर
योश्चभागिन्यांचमातुलान्यांचमातुले । पित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशाम् । तथा मातुलेश्वशुरेमित्रेगुरौगुर्वङ्गनासुच । अशौचंपक्षिणी
रात्रिर्मृतामातामहीयदि । तथा । संस्थितेपक्षिणींरात्रिंदौहित्रेभगिनीसुते । अत्रश्वश्रूश्वशुरमरणेपाक्षिण्यशौचंनिर्गुणजामातृविषयंमित्रे
चस्वगृहेमृतेपक्षिणी । गुरुरत्रउपनीय किंचिद्वेदाध्यापकः । अनुपनीयैकशाखाध्यापकश्चतादृशगुरोः पत्नीगुर्वङ्गनातयोर्मृतयोः पक्षिणी ।
जाबालः । समानोदकानांत्र्यहंगोत्रजानामहः स्मृतं । मातृबंधौगुरौमित्रेमंडलाधिपतौतथा । गुरुर्वात्रवेदांगाध्यापकः । मातृबांधवाः

परिभाषिताः । मातुः पितृष्वसुः पुत्रा मातुर्मातुः स्वसुः सुताः । मातृमातुलपुत्राश्च विज्ञेया मातृबांधवाः ॥ तेषु मृतेष्वेकाहः । मंडलाधिपतौ राजनि मृते एकाहः । बौधायनः । त्रिरात्रमहोरात्रमेकरात्रमिति कुर्वीत । आचार्योपाध्यायतत्पुत्रेषु त्रिरात्रमृत्विजामपि । शिष्यसतीर्थ्यसब्रह्मचारिषु त्रिरात्रमेकरात्रमिति कुर्वीत यथासंख्यमन्वयः । उपाध्यायोऽत्र यत्किंचिदध्यापकः । ऋत्विजां चेति सतम्यर्थे षष्ठी । ऋत्विक्षु मृतेष्वित्यर्थः । एतच्च यजमानगृहे एव मृते षु त्रिरात्रं यजमानस्य ज्ञेयम् । शिष्येऽपि गुरुकुलमृते त्रिरात्रं । सतीर्थः समानगुरुकः । सब्रह्मचारी समानाचार्य्यः । एकरात्रपदमुभयत्र दिनमात्रं रात्रिमात्रं चालक्षयति । शुध्येदित्यनुवृत्तौ विष्णुः । आचार्य्ये मातामहे ऽतीते त्रिरात्रेण । अनौरसेषु पुत्रेषु जातेषु च मृतेषु च । परपूर्वासु भार्यासु सूतासु च मृतासु च ॥ आचार्य्यपत्नीपुत्रोपाध्यायमातुलश्वशुरश्वशुर्यसहाध्यायिशिष्येषु चैकरात्रेण स्वदेशराजनि च । अनौरसेषु औरसवर्ज्जायित्वा एकादशविधपुत्रेषु जातेषु मृतेषु चात्रिरात्रं परपूर्वासु पूर्वपरिगृहीतासु भार्यासु त्रिरात्रं । अत्र यद्यपीदं त्रिरात्राभिधानं त्रैवर्णिकविषयमिति रत्नाकरशुद्धिविश्वयोर्व्याख्यानं तथापि विशेषानभिधानात् सर्ववर्णविषयतया सर्वप्रामाणिकानुमतत्वाच्चातुर्वर्ण्यसाधारणमेव विज्ञेयं । हारलतादिष्वपि विशेषो नोक्तः । आचार्य्यशब्दः पत्नीपुत्रयोर्विशेषणम् । उपाध्यायो यत्किंचिदध्यापकः । मातुलादयः प्रसिद्धाः । सहाध्यायी वेदैकदेशसहाध्येता संपूर्णवेदसहाध्यायिनिवृत्ताध्यायिनश्च । शिष्योऽन्योपनीतो वेदं सांगमध्यापितः । स्वदेशराजः स्वकर्मस्थः । एतेषु मृतेषु एकरात्रं मातुलोऽत्र मातृवैमात्रेयः । मातुः सोदरे पक्षिणी । मातुलादिषु स्वगृहमृतेषु त्रिरात्रं । तथा च प्रचेताः मातृष्वसृमातुलयोः श्वश्रूश्वशुरयोर्गुरोश्च

त्विजिचोपरतेत्रिरात्रम् । यांज्ञवल्क्यः । अनौरसेषुपुत्रेषुभार्यास्वन्यगतासु च । निवासराजनिप्रेतेतदहःशुद्धिकारणम् ॥ अनौ
रसाःपुत्राःअसवर्णाःभार्याश्चासवर्णाःसवर्णेषुपुत्रेषुसवर्णभार्यासुचात्रिरात्रम् । तथाचशंखः । अनौरसेषुपुत्रेषु भार्यास्वन्यगतास्व
पि । परपूर्वासुचस्त्रीषुत्रिरात्राच्छुद्धिरिष्यते ॥ अत्रभार्यास्वन्यगतासुत्रिरात्रंसजातीयोत्कृष्टजातीयपुरुषांतरगासुमृतासुप्रसूतासुच
विज्ञेयम् । अपकृष्टजातीयगमनेमहापातकित्वादशौचाभावादितिहारलता । एवमेवमिताक्षरापि । तथाचशंखलिखितौ । अन्यपूर्वा
सुभार्यासुकृतकेषुसुतेषुच । नानध्यायोनोदकक्रिया । अत्रअन्यपूर्वाभार्यासतीपुनरधमजातीयगाकृतकःपुत्रोऽशास्त्रीयःकल्पितस्तयो
मृतयोर्नाशौचंनोदकक्रियाइतिरत्नाकरः । ब्रह्मपुराणे । आदावन्यस्यदत्तायांकुत्रचित्पुत्रयोर्द्वयोः । पितुर्यत्रात्रिरात्रंस्यादेकंतत्रस
पिंडनम् ॥ एकामाताद्वयोर्यत्रपितरौद्वौचकुत्रचित् । तयोः स्यात्सूतिकादैक्यंमृतकाद्वापरस्परम् । अस्यार्थः । आदौप्रथममन्येन
विवाहितातेनैवजनितपुत्रायदाअन्यमाश्रितातेनापिजनितपुत्राभवतितदाद्वयोरपिपुत्रयोर्मरणप्रसवेचद्वितीयपितुस्त्रिरात्रम् । एवंविधेच
विषयेतत्सपिंडानामेकरात्रम् । एकामाताइत्यादि एकमातृकभिन्नपितृकयोःपुत्रयोर्मध्येएकस्यप्रसवेमरणेचेतरस्यमातृजात्युक्तमशौ
चम् । परपूर्वास्वन्यगतासुचभार्यासुअनौरसेषुपुत्रेषुचयत्प्रतियोगिकभार्यात्वंयत्प्रतियोगिकंपुत्रत्वंतस्यैवत्र्यहाशौचम् । भार्यापुत्रशब्दयोः
संबंधिशब्दत्वात्सपिंडानांत्वशौचाभावः । अतएवमिताक्षरायांप्रजापतिः । अन्याश्रितेषुदारेषुपरपत्नीसुतेषुच । गोत्रिणः स्नानशुद्धाःस्यु
स्त्रिरात्रेणैवतत्पिता ॥ तदयंसमस्तप्रकरणार्थः । सपिंडमरणेदशरात्रम् । अष्टमपुरुषादारभ्यदशमपुरुषंयावत्सकुल्यमरणेत्रिरात्रंतदूर्ध्वंज्ञा
यमाननामजन्मपरंपराकेज्ञातिमरणेपक्षिणी । अज्ञायमाननामजन्मपरंपराकेअस्मद्गोत्रजइत्येवमाकारमात्रज्ञानगोचरमृतेस्नानमात्रं । आचा

र्य्यमरणेतत्संस्कारकर्तुःशिष्यस्यदशरात्रम् । यदिसंस्कारंनकरोतितदाशिष्यस्यत्रिरात्रम् । आचार्य्यपत्नीमरणेआचार्य्यपुत्रमरणेचगु
रुकुलस्थितस्यशिष्यस्यत्रिरात्रम् । गृहस्थितशिष्यस्यतयोर्मरणेएकरात्रम् । उपनीयकिंचिद्वेदाध्यापकेऽनुपनीयसंपूर्णवेदाध्यापकेचगु
रौमृतेपक्षिणी । तथाविधगुरुपत्न्यांचमृतायांपक्षिणी । यत्किंचिदध्यापकेउपाध्यायेमृतेएकरात्रम् । उपाध्यायपत्न्यांचमृतायामेकरात्रम् ।
उपाध्यायपुत्रेचमृतेएकंदिनमात्रंरात्रिमात्रंवा । आचार्य्यगृहस्थितशिष्यमरणेआचार्यस्यत्रिरात्रम् । उपनीयवेदैकदेशमध्यापितस्यानु
पनीयसंपूर्णशाखामध्यापितस्यएकाहोरात्रं । वेदस्वाध्यायिनिमृतेइतरस्यपक्षिणी यत्किंचित्पाठसहाध्यायिनिमृतेएकरात्रं ॥ समानब्र
ह्मचर्य्येएकस्मादधीयानेमृतेइतरस्यएकरात्रंसमानब्रह्मचर्येभिन्नाद्गुरोरधीयानेऽपरस्यएकदिनमात्रंरात्रिमात्रंवा । संनिधिवासिनिमित्रे
स्वगृहेमृतेगृहस्थस्यत्रिरात्रं । अन्यस्मिन्मित्रेस्वगृहमृतेपक्षिणी । अन्यत्रमृतेमित्रेएकरात्रं । श्रोत्रियेस्वगृहेमृतेगृहस्थस्यत्रिरात्रं अश्रोत्रि
येस्वगृहेमृतेएकरात्रं एकग्रामेश्रोत्रियेमृतेग्रामवासिनामेकरात्रं । यजमानस्यस्वगृहेमृते ऋत्विजित्रिरात्रं । अन्यत्रमृतेएकरात्रं ।
सदायाज्ययजमानेमृतेयाजकस्यत्रिरात्रं । मातामहेमृतेदौहित्रस्यत्रिरात्रं मातामह्यांमृतायांपक्षिणी । मातुलेमातृष्वस्रेयेमातुलपुत्रेदौहि
त्रेभागिनेयेचमृतेपक्षिणी । भगिन्यांमातुलान्यांमातृष्वसरिचमृतायांपक्षिणी । मातुलेवैमात्रेयेमातुःपैतृष्वस्रेयेमातुर्मातृष्वस्रेयेमातुर्मा
तुलपुत्रेश्वशुरेश्वश्र्वांश्यालकेचमृतेएकरात्रं निर्गुणजामातुः श्वश्रूश्वशुरमरणेपक्षिणी । स्वगृहेमृतेमातुलेश्वशुरेगुरौ स्वगृहेमृतायां
मातृष्वसरिचत्रिरात्रं । स्वतंत्रेराजनिस्वकर्मस्थेमृतेएकाहोरात्रंप्रजानाम् । अस्वकर्मस्थेराजनिमृतेएकंदिनमात्रंरात्रिमात्रंवा । क्षेत्रजादि
ष्वेकादशपुत्रेषुजातेषुमृतेषुजन्ममातापित्रोस्त्रिरात्रं । क्षेत्रजादीनामपिमातापितृमरणेत्रिरात्रं । परपूर्वासुअन्यगतासुचभार्यासुमृतासुप्रसूता

सुचत्रिरात्रं । एकमातृकयोर्भिन्नपितृकयोर्भ्रात्रोः परस्परंजननमरणयोः स्वमातृजात्युक्तसंपूर्णाशौचंतयोर्मरणेप्रसवेचापितुस्त्रिरात्रं । त
त्सपिंडानांतयोर्मरणेएकरात्रमशौचंभवति । हीनवर्णगामिनीषुभार्यासुत्वशौचाभावः । अथनिर्हाराद्यशौचं । अंगिराः । यःकश्चिन्निर्हरे
त्प्रेतमसपिंडः कथंचन ॥ स्नात्वासचेलःस्पृष्ट्वाग्निंतस्मिन्नेवाह्निशुध्यति । निर्हरेद्वहिर्नयेत् । इदंचधर्मबुद्ध्यानाथप्रेतवहनेशौचं । पराशरः ।
अनाथंब्राह्मणंप्रेतंयेहरंतिद्विजातयः । पदेपदेयज्ञफलमानुपूर्व्याल्लभंतितेते । नतेषामशुभंकिंचित्पापंवाशुभकर्मणा । जलावगाहनात्तेषांस
द्यःशौचंविधीयते । प्रेतसंस्पर्शसंस्कारैर्ब्राह्मणोनैवदुष्यति । वोढाचाप्यग्निदाताचसद्यः स्नात्वाशुचिर्भवेत् । संस्कारोऽत्रप्रेतप्रसा
धनं । अग्निदानस्यपृथगुपादानात् । पैठीनसिः । असंबंधिद्विजान्वहित्वाचसद्यःशौचम् । संबंधेत्रिरात्रं सद्यःशौचंधर्मबुद्ध्यादाहा
दौ संबंधेसतित्रिरात्रं । मातुलमातृष्वस्रादीनांयेषांमरणेअशौचत्वमुक्तंतेषांदाहादौत्रिरात्रमशौचं । तंचमातुलादयो व्यवस्थयांलिखति
मनुः । अनुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेवच । स्नात्वासचेलःस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यति ॥ ज्ञात्यनुगमनेआग्निस्पर्शघृतप्राशनमात्रमधि
कंविधीयते । अशौचंतुयथोक्तमेव । कूर्मपुराणे । असपिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत् । अशित्वाचसहोषित्वादशरात्रेणशुध्यति ॥ यद्यन्नंना
त्तितेषांतुत्रिरात्रेणततःशुचिः । अनदन्नन्नमह्नैवनचेत्तस्मिन्गृहेवसेत् ॥ सोदरेष्वेतदेवस्यान्मातुराप्तेषुबंधुषु । निर्हृत्येतिनिर्हाराद्युपलक्षणं
वाक्यांतरेवहनादावपितुल्याशौचविधानात् । गृहवासाभावेतदन्नभोजनेयथात्रिरात्रंतथान्नभोजनाभावेतद्गृहवासेपित्रिरात्रंतुल्यन्या
यात् । एतच्चसर्वंनिर्हरणाद्यशौचंब्राह्मणनिर्हरणादौब्राह्मणस्यैव । अन्यत्रविशेषोवक्ष्यते । कू[illegible]राणे । यस्तैःसहाशनंकुर्याच्छ
यनादीनिचैवहि । बांधवोवापरोवापिसदशाहेनशुध्यति ॥ आदिपदमालिंगनांगसंवाहनादिपरं ॥ दशाह[illegible]पलक्षणं ॥ तद्गाशौचापगमेनशुध्य

तीत्यर्थः । तथा यस्तेषामन्नमश्नातिसकृदेवापिकामतः । तदशौचेनिवृत्तेसौस्नानंकृत्वाविशुध्यति ॥ तेषांब्राह्मणादीनामशौचेयःसकृदपि कामतोबुद्धिपूर्वमश्नातिसयज्जातीयाशौचान्नंभुंक्तेसतज्जातीयाशौचापगमेशुध्यति । शेषेचस्नानं । प्रमादतस्तुभोजनेकृतेनदोषः । दुर्भिक्षस्तु द्धिपूर्वकेभोजनेविशेषमाह । यावत्तदन्नमश्नातिदुर्भिक्षोपहृतोनरः । तावंत्यहान्यशौचंस्यात्प्रायश्चित्तंततश्चरेत् ॥ प्रायश्चित्तंचात्रत्रिरा त्रंदुग्धपानमात्ररूपं । तथाचांगिराः । ब्रह्मक्षत्रविशांभुक्त्वानदोषोस्त्यग्निहोत्रिणां ॥ सूतकेशावआशौचेचास्थिसंचयनात्परम् ॥ अन्नसत्रप्रवृत्तानामाममन्नमगर्हितं । भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुपयःपिबेत् ॥ ब्राह्मणादीनांत्रयाणामाग्निहोत्रिणांसूतकेसिद्धान्नभोजने दोषाभावः । मरणाशौचेत्वस्थिसंचयानंतरंतात्सिद्धान्नभोजनेदोषाभावः । अन्नग्निनामन्नसत्रप्रवृत्तानांनियमपूर्वकंप्रात्यहिकान्नदा यकानामामान्नेदोषाभावः । सिद्धान्नेतुभुक्तदोषएव ॥ तत्रत्रिरात्रंदुग्धमात्रपानंप्रायश्चित्तं । पयःपदंदुग्धपरमितिहारलता । अशौचंतुत त्तज्जात्युक्तमेवाशौचान्नभोजनेवाक्यांतरोक्तं । कूर्मपुराणे । दशाहेनशवस्पर्शीऽसपिंडस्तुविशुध्यति । यदिनिर्दहतिप्रेतंप्रलोभाक्रां तचेतनः । दशाहेनद्विजःशुध्येद्द्वादशाहेनभूमिपः । अर्द्धमासेनवैश्यस्तुशूद्रोमासेनशुध्यति ॥ यद्रात्रेणाथवाशुद्धिस्त्रिरात्रेणाथवा पुनः ॥ अत्रचषड्रात्रमशौचमापत्कालेमूलेनदाहेकृतेअत्यंतापत्कालेदाहेकृतेत्रिरात्रमितिविभागः । मनुः । अवरश्चेद्वरंवर्णमवरंवाव रोयदि । अशौचेसंस्पृशेत्स्नेहात्तस्याशौचेनशुध्यति ॥ अवरोहीनजातिः ॥ वरः उत्कृष्टजातिः । सयदिस्पृशेद्दहनार्थंतस्यशवस्य यज्जातीयंःशवस्तज्जात्युक्तेनाशौचनाशौचेकालेनशुद्ध्यतीत्यर्थः । पराशरः । प्रेतीभूतंतुयः शूद्रंब्राह्मणोज्ञानदुर्बलः । अनुगच्छेन्नी यमानंत्रिरात्रमशुचिर्भवेत् ॥ याज्ञवल्क्यः । ब्राह्मणेनानुगंतव्योनतुशूद्रःकथंचन । अनुगम्यांभसिस्नात्वाऽग्निंस्पृष्ट्वाघृतभुक्शुचिः ॥

इदंचसर्वथाशूद्रानुगमननिषेधेसति । यदितुकार्यांतरेणापिस्वशूद्रानुगमनमवर्जनीयंभवतितदास्नानादिनाशुद्धिः । ब्रह्मपुराणे । योसवर्णंतुमूल्येननीत्वाचैवदहेन्नरः । अशौचंतुभवेत्तस्यप्रेतजातिसमंनृप ॥ सर्ववर्णाः सजातीयंदग्ध्वात्र्यहमशौचिनः । भवंति परजातीयंनिर्दह्यपरजातिवत् ॥ सर्ववर्णानांस्वजातीयदाहेयदिदंत्रिरात्रंनस्नेहेनकृते तदन्नभोजनतद्गृहवासयोरेकंयः करोतितत्परं च । तथा । आचार्यंचाप्युपाध्यायंगुरुंवापितरंचवा । मातरंवास्वयंदग्ध्वाव्रतस्थस्तत्रभोजनं ॥ कृत्वापततिनोतस्मात्प्रेतान्नं तत्रभक्षयेत् । अन्यत्रभोजनंकुर्यान्नचतैःसहसंवसेत् ॥ एकाहमशुचिर्भूत्वाद्वितीयेहनिशुध्यति ॥ व्रतस्थोब्रह्मचारी । आचार्यादिकंस्वयंदग्ध्वातद्गृहेभोजनंकृत्वापततिव्रतानधिकारीभवतितस्मात्तत्रगृहेन्नंनभक्षयेत् । तथा ॥ दाहयित्वातुमूल्येनगुरुंप्रेतंभवेत्ततः । अशौचंदशरात्रंतुशिष्यस्येतिविनिश्चयः ॥ वेतनदानेनपरद्वारायदागुर्वादिकंदाहयेत्तदाशिष्यस्यदशरात्रमन्यथाऽन्यदेवेत्यर्थः । तथा । ब्राह्मणोनदहेच्छूद्रंमित्रंवाप्यन्यमेववा । मोहाद्दग्ध्वाततःस्नात्वास्पृष्ट्वाऽग्निंप्राशयेद्घृतम् ॥ उपवासरतःपश्चात्त्रिरात्रेणविशुध्यति । सर्वेषांस्यादहोरात्रंसर्वानुगमनादपि ॥ शवस्पर्शविधानोक्तंविहितंसार्ववर्णिकं ॥ अत्रब्राह्मणस्यशूद्रदाहेयत्त्रिरात्रमुक्तंतत्पुत्रभ्रात्रादिरूपस्यशूद्रस्यदाहेद्रष्टव्यं । संबंधरहितशूद्रदाहेयत्तदशौचतुल्यमेवाशौचंब्राह्मणवर्जंसर्वेषांसर्वाऽनुगमनेऽहोरात्रंशवस्पर्शविधानोक्तमिति प्रकरणार्थोपसंहारः । तदियमत्रव्यवस्था । ब्राह्मणस्यधर्मबुद्ध्यानाथमृतब्राह्मणोद्दहनेतथाविधब्राह्मणदाहेचस्नानमात्रेणशुद्धिः । तथाविधमृतब्राह्मणानुगमनेस्नानानंतरमग्निस्पर्शनघृतप्राशनेकृत्वाशुद्धिः । यदिघृतप्राशनंनभवतितदातमहोरात्रंव्याप्याशुद्धिः । उदासीनस्यस्नेहेनदाहादौकृतेएकरात्रमशौचं । मातुलमातृष्वस्रेयपैतृष्वस्रेयमातुलपुत्रमातुलानीमातृष्वसृपितृष्वसृभगि

नीभागिनेयमातामहमातामहीदौहित्रभगिनीपतिजामातृश्वशुरश्वश्रूश्यालकशिष्याचार्याचार्यपुत्राचार्यपत्नीगुरुगुरुपत्नीगुरुपुत्रयाज्यऋत्विग्मातु
मातुलमातृष्वस्रेयमातुःपैतृष्वस्रेयमातुर्मातृष्वसृमातुर्मातुलपुत्राणां दाहादौ कृते त्रिरात्रम् । दाहादिकृत्वामृतसंबंधिगृहे
योवसतितत्सिद्धान्नंचभुंक्तेतस्यमृतजात्युक्तमशौचम् । यस्तन्मृतसंबंधिगृहेवसतितदन्नंनभुंक्तेयोवातदन्नंभुंक्तेनतद्गृहेनवसतितस्यत्रिरात्रम
शौचम् । योबुद्धिपूर्वकंयस्याशौचेऽन्नमश्नातितस्यतदशौचसमानमेवाशौचम् । शेषेचस्नानम् । प्रमादतोशौचयन्नभोजनेदोषाभावः दुर्भिक्षे
बुद्धिपूर्वकमपियावदशौचान्नमश्नातितावदेवाशौचम् । अशौचापगमानंतरेत्रिरात्रंदुग्धपानरूपंप्रायश्चित्तम् । मूल्येनप्रेतदहनवहनयोः कृत
योर्वाह्यजात्युक्तमशौचम् । अशौचिभिः सहशयनासनालिंगनांगसंवाहनानिकृत्वातत्तज्जात्युक्ताशौचम् । शिष्यस्यगुरूपाध्यायाचार्यदाहेमू
ल्येनपरद्वाराकारितेदशरात्रशौचम् । ब्रह्मचारिणः पित्रादिदाहंकृत्वाएकरात्रम् । क्षत्रियाणांचातुर्वर्णानुगमनेऽहोरात्रम् । ब्राह्मणस्यक्षत्रियवै
श्यानुगमनेऽहोरात्रम् । शूद्रस्यशवानुगमनेत्रिरात्रम् । प्रसंगेनशूद्रशवानुगमनेस्नानाग्निस्पर्शघृतप्राशनैः शुद्धिः । पारस्करः । अस्थिसंचय
नादर्वाग्यदिविप्रोऽश्रुपातयेत् । मृतेशूद्रेगृहंगत्वात्रिरात्रेणविशुध्यति ॥ अस्थिसंचयनादूर्ध्वमासंयावद्विजातयः । दिवसेनैवशुध्यंतिवा
ससांक्षालनेनच ॥ स्वजातौदिवसेनैवक्षत्रियवैश्ययोः । मासंयावदितिशूद्राशौचकालंव्याप्येत्यर्थः । स्वजाताविति शूद्रस्य । ते
नायमर्थः । शूद्रस्यशूद्रेऽसपिंडेमृतेऽश्रुपातने एकाहः । शूद्रेमृतेऽश्रुपातने क्षत्रियवैश्ययोर्द्व्यहाच्छुद्धिः तथा मृतस्ययावद
स्थीनिब्राह्मणस्यहुतान्यपि । तावद्रोबांधवस्तत्ररौतितद्बांधवैःसह ॥ स्नानात्तस्यभवेच्छुद्धिस्ततस्त्वाचमनंभवेत् । अबांधवोत्रब्राह्मणः ।
ततस्त्वाचमनमितिस्नानानंतरमाचमनंचेत्यर्थः । तथा । अनस्थिसंचयाद्विप्रो रोतिचेत्क्षत्रवैश्ययोः । ततःस्नातःसचेलस्तु द्वितीयेऽहि

विशुध्यति ॥ सचैलस्नानमन्येषामकृतेऽप्यस्थिसंचये । कृते तु केवलं स्नानं क्षत्रविट्शूद्रजन्मनाम् ॥ अस्थिसंचयनादूर्ध्वमहोरात्रेण शुध्यति ।
अनस्थिसंचिते शूद्रे ब्राह्मणो रौति चेज्जडः ॥ ततः स्नातः सचैलस्तु शुध्येत्तु दिवसैस्त्रिभिः ॥ सचैलस्नानमित्यादिनाऽकृतेऽप्यस्थिसंचये ॥ अ-
न्येषां क्षत्रियादीनां शूद्रे मृते ऽश्रुपातने सचैलं स्नानमुक्तं तत् तद्गृहगमनाभावपक्षे ऽन्यथा त्र्यहः क्षत्रविशोः । एकाहः शूद्रस्य पूर्वोक्तः । कूर्मपुराणे ।
अस्थिसंचयनादर्वागेकाहः क्षत्रवैश्ययोः । अन्यथा चैव सज्योतिर्ब्राह्मणे स्नानमेव च ॥ इदमेकाहादिविधानं गुणवत्क्षत्रवैश्ययोः ॥ मृतयोरश्रुपा-
तेन विप्रस्य गुणहीनयोः ॥ तयोर्मरणे अश्रुपातने द्वितीये ऽह्नि पूर्णे संध्यापर्यंते न ब्राह्मणः शुध्यति । अस्थिसंचयादित्यादिवाक्येन पूर्वोक्तेन ।
अन्यथेति अस्थिसंचयने कृते सज्योतिर्यदि वाऽश्रुपातनं तदा दिनांते न यदि रात्रौ तदा रात्र्यंते न शुद्धिरित्यर्थः । शुध्येदित्यनुवृत्तौ विष्णुः ।
सर्वस्यैव प्रेतस्य बांधवैः सहाश्रुपाते कृते स्नानेनाकृते ऽस्थिसंचयने सचैलस्नानेनाचमनेन च विप्रस्य शुद्धिः । इदं तद्गृहगमनाभावपक्षे ज्ञेयम् ।
तदयं प्रकरणार्थः । असपिंडे मृते ब्राह्मणे तद्गृहगत्वा तद्बंधुभिः सहाश्रुपातमस्थिसंचयनात्पूर्वं कृत्वा सचैलस्नानेनाचमनेन च शुद्धिर्ब्राह्मणस्य
अस्थिसंचयनानंतरं स्नानमात्रेण । क्षत्रिये मृते ऽस्थिसंचयनात्पूर्वं रोदने विप्रस्य त्र्यहेन वैश्ये ऽपि त्र्यहेन । अस्थिसंचयनादूर्ध्वं क्षत्रिये वैश्ये चाहर्दिन-
मात्रं रात्रिमात्रं वा । शूद्रे मृते ऽस्थिसंचयात्पूर्वं रोदने विप्रस्य त्रिरात्रं । अस्थिसंचये एकाहोरात्रं । क्षत्रिये वैश्ये च मृते ऽस्थिसंचयात्पूर्वं क्षत्रियवैश्य-
योरश्रुपाते सचैलस्नानम् । अस्थिसंचयानंतरं स्नानमात्रं । शूद्रे मृते क्षत्रियवैश्ययोरस्थिसंचयनात्पूर्वं त्र्यहेन । तदनंतरं दिनमात्रेण रात्रिमात्रेण वा ।
शूद्रे मृते शूद्रस्याश्रुपाते ऽस्थिसंचयनात्पूर्वमेकाहेन । तदनंतरं सचैलस्नानेन । यदि तु मृतगृहगमनं कृत्वैवाश्रुपातपातितदा सर्वेषामिति वर्णानां सर्व-
स्यास्थिसंचयात्पूर्वं सचैलस्नानेन । तदनंतरं स्नानमात्रेण शुद्धिः । इति निर्हारादिशौचं । अथानशौचिनः । तत्र प्रचेताः । कारवः शिल्पिनो

वैद्यादासीदासास्तथैवच । राजानोराजभृत्याश्चसद्यःशौचाःप्रकीर्तिताः । कारवः शूर्पकारादयः । शिल्पिनश्चित्रकाररजकादयः । वैद्याश्चिकि
त्सकाः । दासीदासाःकर्मकराः । राजानोभूपतयः । राजसेवकाः । एतेसद्यःशौचाःसद्यस्तत्क्षणादेवशौचंशुद्धिर्येषांएवंभूताभवंति । एतेषा
मशौचंनभवत्येवेत्यर्थः । अस्मिन्प्रकरणेसद्यःशौचशब्देनाशौचाभावएवोक्तइति । शुद्धिविवरत्नाकरौ । अयंचाशौचाभावः कारुप्रभृती
नांप्रतिनियतएवस्वशिल्पादौकार्येअस्पृश्यत्वप्रतिषेधरूपोज्ञातव्यः । न तु सर्वेषुदानश्राद्धादिधर्मकृत्येष्वशौचाभावः । तथाचविष्णुः । अ
शौचंनराज्ञांराजकर्मणिन व्रतिनांव्रतेनसत्रिणांसत्रेनकारुणांस्वकर्मणिनराज्ञामाज्ञाकारिणांनदेवप्रतिष्ठाविवाहयोः । पूर्वसंभृतयोः व्रति
नामारब्धव्रतानांसत्रिणांदानेकृतसंकल्पानांदेवप्रतिष्ठाविवाहयोः पूर्वसंभृतयोः प्रारब्धयोः । एवंचकर्मविशेषेअशौचाभावविधेरन्यत्रसं
ध्यावंदनादिकअदृष्टकर्मणिस्वस्वजात्युक्तमेषामशौचमवतिष्ठते । छंदोगपरिशिष्टेकात्यायनः । नत्यजेत्सूतकेकर्मब्रह्मचारीस्वयंक्व
चित् । नदीक्षणात्परंयज्ञेनकृच्छ्रादितपश्चरन् । पितर्यपिमृतेनैषांदोषोभवतिकर्हिचित् । अशौचंकर्मणोन्तेस्यात्र्यहंवाब्रह्मचा
रिणां । सूतकमितिमृतकस्याप्युपलक्षणं । ब्रह्मचारीसूतकेअशौचेस्वकर्मब्रह्मचर्याश्रमविहितंनत्यजेत् । यज्ञेदीक्षणात्परंदीक्षणीयेष्टेरनं
तरमशौचेसतिस्वकंकर्मनत्यजेत् । याज्ञिकः दीक्षणात्पूर्वंत्वशौचेवृत्तेयज्ञेप्यशौचमवतिष्ठतएवेत्यर्थः । तपस्वीकृच्छ्रादितपश्चर
न्स्वकंकर्मनत्यजेत् । एतदप्यशौचाभावविधानंतत्तत्कर्मविषयमेवकर्मांतरेत्वशौचमेव । एषांकर्मणोन्तेब्रह्मचर्यदीक्षातपो
रूपस्यान्तेअवसानेस्वजात्युक्तमशौचंभवति । ब्रह्मचारिणःपुनःपित्रोरपिमरणेव्रतचर्यावसानेत्र्यहमेवाशौचंभवति । यदाह
मनुः । आदिष्टीनोदकंकुर्यादाव्रतस्यासमापनात् । समाप्तेतूदकंकुर्यात्त्रिरात्रमशुचिर्भवेत् ॥ आदिष्टमादेशोगुरोर्मौदिवासुषु

प्याशृत्यादिकोऽस्यास्तीत्यादिब्रह्मचारी । ब्रह्मपुराणे । गृहीतमधुपर्कस्ययजमा ॥ ऋत्विजः । पश्चादशौचेपतितेनभवेदिति
निश्चयः ॥ एवंचमधुपर्कग्रहणात्पूर्वमशौचोपनिपाते अशौचंभवत्येवेत्यर्थः । तथा । गृहीतनियमस्यापिनस्यादन्यस्यकस्य
चित् । निमंत्रितेषुविप्रेषुप्रारब्धेश्राद्धकर्मणि ॥ तथा । नैष्ठिकस्याथवान्यस्यभिक्षार्थंप्रस्थितस्यच । वानप्रस्थस्यवान्यत्रभा
धिकारस्यसर्वदा ॥ प्रतिग्रहाधिकाराच्चनिवृत्तस्यनविद्यते । नैष्ठिकस्य नैष्ठिकब्रह्मचारिणः यावज्जीवब्रह्मचारिणः । अन्यस्यचतुर्था
श्रमिणःअशौचेभिक्षाग्रहणेदोषाभावः । उपकुर्वाणस्यतुब्रह्मचारिणोगृहस्थस्यचाशौचेभिक्षाग्रहणेदोषः । वानप्रस्थस्यअन्यत्रव
सादःयत्रग्रामेसाधिकारस्यभिक्षाधिकारिणोऽशौचेभिक्षाग्रहणेदोषाभावः । अन्यस्यापि सर्वप्रतिग्रहनिवृत्तस्याभिक्षामात्रवृत्तेरशौ
चेभिक्षाग्रहणेदोषाभावः । जाबालः । ब्रह्मचारिणिभूपेच यतौशिल्पिनिदीक्षिते । यज्ञेविवाहेसत्रेचसूतकंनकदाचन ।
अत्रयतेःसंन्यासिनएवात्यन्तमशौचाभावः । अन्येषांकालविशेषेकार्य्यविशेषेचाशौचाभावोवाक्यान्तरात् । ब्रह्मपुराणे । अपिदातृ
गृहीत्रोश्चसूतकेमृतके तथा । अविज्ञाते नदोषःस्याच्छ्राद्धादिषुकदाचन ॥ विज्ञातेभोक्तुरेवस्यात्प्रायश्चित्तादिकं क्रमात् ।
विज्ञातेऽशौचेसतियोभुंक्तेतस्यभोक्तुःप्रायश्चित्तमित्यर्थः । तथा । भोजनार्द्धेतुसंभुक्तेविप्रैर्दातुर्विपद्यते । यदाकश्चित्तदो
च्छिष्टशेषंत्यक्त्वासमाहिताः ॥ आचम्यपरकीयेनजलेनशुचयोद्विजाः । विप्रैःभोजनार्द्धेसंभुक्तेसतिदातुःकश्चिद्यदिविपद्यतेम्रियेत
तदाभुक्तशेषंत्यक्त्वाद्विजाः परकीयेनजलेनाचम्यशुचयोभवन्तीत्यर्थः । विपत्तेरुपलक्षणतयाप्रसवेप्येवंज्ञेयम् । तथा ।
विवाहयज्ञयोर्मध्येसूतकेसतिचांतरा । शेषमन्नंपरैर्देयाद्दातॄन्भोक्तॄंश्च न स्पृशेत् ॥ परैर्देयादितिविवाहेयज्ञेचप्रवर्त्तमानेमध्ये

सूतके मृतके च पतिते. शेषमन्नमपरः परद्वारा दापयेत् । एवं सति दातृत्व भोक्तृत्वनस्पृशेद्दोषइतिशेषः । तथा । दाने विवाहे यज्ञे च संग्रामे देशविप्लवे । आपद्यपि च कष्टायां सद्यःशौचं विधीयते ॥ दाने तु ऊपुरुषदानादौ । विवाहे चारब्धे देशविप्लवे राष्ट्रभङ्गे चाशौचाभावः । संग्रामे मृतस्यान्येषां सद्यः शौचं भवति । कष्टायामापदि ग्रासाभावेन प्राणनाशसंभाव्यमाने प्रतिग्रहे कर्त्तव्ये सूतकं न भवतीत्यर्थः । यमः । दैवे भये समुत्पन्ने प्रधानांगे विनाशिते । पूर्वसंकल्पिते चार्थे तस्मिन्नाशौचमिष्यते ॥ दैवे भये दुर्भिक्षोपसर्गमरणादौ जाते प्रधानांगे नृपतौ परचक्रेण नाशिते राष्ट्रोपप्लवे सत्यशौचं स्वस्वजात्युक्तं न भवतीत्यर्थः । पूर्वसंकल्पितं यत् किंचित् पुष्करिण्यादि धर्मकार्यमशौचात् पूर्वमारब्धं तत्र सर्वत्र जनने मरणे सत्यशौचं न भवतीत्यर्थः । अत्र च समस्त एव प्रकरणे तत्तत्कार्यविशेषे एवाशौचाभावो न सर्वकार्ये अशौचाभाव इत्यवधातव्यम् ॥ इति रुद्रधरकृतौ शुद्धिविवेके जननमरणयोः शुद्धिपरिच्छेदः ॥ अथाधिकारिणः । तत्र मरीचिः मृते पितरि पुत्रेण क्रियाः कार्याः प्रयत्नतः । बहवः स्युर्यदा पुत्राः पितुरेकत्र वासिनः ॥ सर्वेषान्तु मतं कृत्वा ज्येष्ठेनैकेन यत्कृतम् । द्रव्येण चाविभक्तेन सर्वैरेव कृतं भवेत् ॥ पुत्रेण द्वादशविधपुत्रेण । तत्रापि ज्येष्ठस्य प्रशंसा । यदि तु तस्य क्षतादिनाऽनधिकारस्तदा नियतकालकर्त्तव्येषु प्रेतश्राद्धेषु कनिष्ठस्याप्यधिकारः । तत्राप्यौरसस्य मुख्यतयाधिकारः । तदभावे पुत्रिकापुत्रस्य तयोरभावे क्षेत्रजादीनामधिकारः । पूर्वपूर्वाभावे उत्तरोत्तराणां । तथा च मनुः । आज्यं विना यथा तैलं सद्भिः प्रतिनिधिः स्मृतः । तथैकादश पुत्रास्तु पुत्रिकौरसयोर्विना । पुत्रलक्षणमग्रे वक्ष्यते । लघुहारीतः । सपिण्डीकरणं यावत्प्रेतश्राद्धानि षोडश । पृथङ्नैव सुताः कुर्युः पृथग्द्रव्या अपि क्वचित् ॥ छन्दोगपरिशिष्टे कात्यायनः । पितामहः पितुः पश्चात्पंचत्वं यदि गच्छति । पौत्रेणैकादशाहादि कर्त्तव्यं श्राद्धषोडशम् ॥ नैतत्पौत्रेण कर्त्तव्यं पुत्रवांश्चेत्पितामहः ।

विष्णुपुराणे । पुत्रः पौत्रः प्रपौत्रो वा तद्वद्वा भ्रातृसंततिः । सपिंडसंततिश्चापि क्रियार्हो नृप जायते ॥ एषामभावे सर्वेषां समानोदकसंततिः । मातृ
पक्षस्य पिण्डेन संबंधो यो जलेन च ॥ भ्रातृसंततिरित्यत्र भ्राता च तत्संततिश्चेति द्रष्टव्यम् । मातृपक्षस्यापिंडेन संबन्धो मातृसपिंडः मातृपक्षस्य जले
न संबंधो मातृपक्षसमानोदक इत्यर्थः । कुलद्वये पि चोच्छिन्ने स्त्रीभिः कार्या क्रिया नृप । संघातान्तर्गतैर्वापि कार्या प्रेतस्य सत्क्रिया ॥ उच्छिन्नबन्धु
रिक्थाद्वा कारयेदवनीपतिः । स्त्रीभिरिति ॥ यथाविध्यपरिगृहीताभिः संघातान्तर्गतैरिति विदेशं प्रस्थितानाम् । सार्थान्तर्गतैरित्यर्थः । उच्छिन्ना
बन्धवो यस्य स उच्छिन्नबन्धुस्तस्य रिक्थाद्धनात् । ल्यब्लोपे पंचमी । तेन सर्वबन्धुहीनस्य धर्मप्रदायकस्मोचेत् तद्द्वारा तदौर्ध्वदेहिकं कारये
दित्यर्थः । तथा । पूर्वाः क्रिया मध्यमाश्च तथा चैवोत्तराः स्मृताः । त्रिप्रकाराः क्रियाश्चैतास्तासां भेदान् शृणुष्व मे ॥ आदाहाद्वार्यायुधादिस्पर्शाद्य
न्ताश्च याः क्रियास्ताः पूर्वा मध्यमा मासि मास्येकोद्दिष्टसंज्ञकाः । प्रेते पितृत्वमापन्ने सपिण्डीकरणादनु । क्रियन्ते याः क्रियाः पित्रोः प्रोच्यन्ते ता नृ
पोत्तराः । तत्र विभागमाह स एव । पितृमातृसपिण्डैस्तु समानसलिलैस्तथा ॥ संघातान्तर्गतैर्वापि राज्ञा वा धनहारिणा ॥ पूर्वाः क्रियास्तु कर्तव्याः
पुत्राद्यैरेव चोत्तराः । दौहित्रैर्वा नरश्रेष्ठ कार्यास्तत्तनयैस्तथा । मृताहनि च कर्तव्याः स्त्रीणामप्युत्तराः क्रियाः । प्रतिसंवत्सरं यावदेकोद्दिष्टविधा
नतः ॥ अत्र पितृमातृसपिंडादयः पूर्वक्रियां कुर्युर्नोत्तरां मध्यमक्रियां त्वेषामनियमः पुत्राद्या भ्रातृसंततिपर्यन्ता एवोत्तरक्रियायामधिकारिणः
दौहित्रैरिति पुत्रिकापुत्रविषयकमिति कल्पतरुः । गौतमः । पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युः । तदभावे ऋत्विगाचार्यौ । एतच्च
भ्रात्राद्यभावे सति द्रष्टव्यं । तथा च प्रचेताः । पुत्रो भ्राता पिता वापि मातुलो गुरुरेव च । एते पिंडप्रदा ज्ञेयाः सगोत्राश्चैव बान्धवाः ॥ भ्रातेत्यविशेषोप
दानात् कनिष्ठत्वमत्राविवक्षितम् । तत्पत्न्यभावे कनिष्ठभ्रातुरधिकारः । तदभावे ज्येष्ठस्य तदभावे पितुः । यत्तु । न पुत्रस्य पिता दद्यान्नानुजस्य

तथाग्रजः ॥ इतिछंदोगपरिशिष्टवचनं तद्भ्रातृसंभवेपितुरनाधिकारबोधकं कनिष्टभ्रातृसद्भावेज्येष्ठभ्रातुरनधिकारबोधकम् । शंखः । पितुः
पुत्रेणकर्त्तव्यापिंडदानोदकक्रिया । पुत्राभावेतुपत्नीस्यात्पत्न्यभावेसहोदरः ॥ भार्यापिण्डंपतिर्दद्यात्पत्येभार्यातथैवच । श्वश्र्वादेश्च
स्नुषाचैवतंदभावेसपिण्डकः ॥ अपुत्रायाः पत्न्याःपिंडंपतिर्दद्यात् । यत्तु नजायायाःपतिर्दद्यादपुत्रायाअपिक्वचिदितिकात्यायनवचनं ॥ त
दृमरिणीतिभार्याविषयं । तस्याअपिपूर्वपतिसद्भावेउत्तरस्यानाधिकारः । तदभावेत्वनन्यगत्याउत्तरस्यैवाधिकारः । ब्रह्मपुराणे । नकदाचि
त्स्वगोत्रायश्राद्धंकार्यमगोत्रजैः । असमाप्तव्रतस्यापिकर्त्तव्यंब्रह्मचारिणः ॥ श्राद्धंतुमातापितृभिर्नतुतेषांकरोतिसः । नित्यंगुरुकुलस्थस्य
गुरुःसब्रह्मचारिणः ॥ निरन्वयेसपिंडेतुमृतेसतिदयान्वितः । तदशौचंपुरातीत्वाकुर्यात्तत्पितृवत्क्रियाम् ॥ स्वगोत्रायेति स्वंगोत्रं
विद्यमानंयस्यसस्वगोत्रः । तेनायमर्थः । विद्यमानस्वगोत्रस्यासगोत्रेणमातृसपिंडादिनाराज्ञा वा न श्राद्धंकार्यम् ॥ ब्रह्मचारिणोपिश्राद्धं
पित्रैवकर्त्तव्यं । ब्रह्मचारिणांतुमातृपितृश्राद्धंनकर्त्तव्यं । अन्याभावेतुवाक्यान्तरेणदाहादिकर्त्तव्यम् । ब्रह्मचर्यसमाप्तौत्र्यहाशौचं श्राद्धं
चकर्त्तव्यम् । यदितुब्रह्मचारिणःसपिण्डोपिनभवतितदापितृवत् । यथापितापुत्रस्यश्राद्धादिकंकरोति तथाऽसपिण्डोपिगुरुरशौ
चादिकंकृत्वाश्राद्धंकुर्यात् । तथा । त्रयाणामाश्रमाणांचकुर्याद्दाहादिकांक्रियां । यतःकिञ्चिन्नकर्त्तव्यंनचान्येषांकरोतिसः ॥
तथा । भ्रातुर्भ्रातास्वयंचक्रेतद्भार्याचेन्नविद्यते ॥ तस्यभ्रातृसुतश्चक्रेयस्यनास्तिसहोदरः ॥ अत्रसहोदराभावेभ्रातृपुत्रस्याधिकारबो
धनात् । बहूनामेकजातानांयद्येकःपुत्रवान्भवेत् । सर्वेतेनेवपुत्रेणपुत्रिणोमनुरब्रवीत् ॥ इतिमनुवचनंपितृव्यादीनांपुत्रित्वातिदेश
कंनतुभ्रातृपुत्रस्यपुत्रत्वातिदेशकमितिव्यक्तमेवप्रतीयते । अन्यथापुत्रत्वाद्भ्रातृपुत्रस्यैवाधिकारःस्यात् । यत्तद्वचनंद्विवाचनिक

मित्विन्यायाच्चभ्रातृपुत्रस्यपुत्रत्वातिदेशकंनमनुवचनमित्यवधीयते । एवंचैतत्तुल्यतया । बह्वीनामेकपत्नीनामेकाचेत्पुत्रिणी
भवेत् । सर्वास्तेनैवपुत्रेणपुत्रिण्योमनुरब्रवीत् ॥ इत्यतिदेशोपिसत्यपिसपत्नीपुत्रेपत्युरेवाधिकारः । नचैवंपितृव्यानांसपत्नीमातु
श्चपुत्रित्वातिदेशेकिंफलमितिवाच्यम् । पुत्रित्वातिदेशेनपुन्नामनरकगमनाभावस्यसपत्नीमातुश्चपुत्रित्वेसपिण्डनसंभवस्यचफलस्य
विद्यमानत्वात् । तथा । दत्तानांचाप्यदत्तानांकन्यानांकुरुतेपिता । चतुर्थेहनितास्तेषांकुर्वीरन्सुसमाहिताः ॥ दत्तानां वाग्द
त्तानामित्यर्थः । मातामहानांदौहित्राःकुर्वन्त्यहनिचापरे । तेपितेषांप्रकुर्वन्तिद्वितीयेहनिसर्वदा ॥ जामातुःश्वशुराश्चक्रुस्तेषांतेपिचसं
यतः । मित्राणांतदपत्यानां श्रोत्रियाणांगुरोस्तथा । भागिनेयसुतानांचसर्वेषांत्वपरेहनि । श्राद्धंकार्यन्तुप्रथमंस्नात्वाकृत्वान
वक्रियां ॥ राज्ञिमृतेऽसपिण्डेतुनिरपत्येपुरोहितः । मंत्रीवातदशौचंतुपूरयित्वाकरोतिसः । अत्रदौहित्रजामातृप्रभृतीनांसपि
ण्डाभावेऽधिकारः । तेषांचद्वितीयाहे । श्राद्धविधानंचास्थिसंचयश्राद्धपरंआद्यश्राद्धंतुचतुर्थदिनएवकर्त्तव्यं संबन्धेपातित्रिरात्रमि
तिदाहादिकरणेत्रिरात्राशौचाभिधानात् । दाहाद्यकरणेतुयथोक्तस्वस्वाशौचापगमेदौहित्रादिभिराद्यश्राद्धंकार्यम् । तथा । ब्राह्म
णस्त्वन्यवर्णानांनकरोतिकदाचन । कामाल्लोभाद्भयान्मोहात्कृत्वातज्जातितांव्रजेत् ॥ पुत्राःकुर्वन्तिविप्रायक्षत्रविट्शूद्रयोनयः । स
तादृशेभ्यःपुत्रेभ्योनकरोतिकदाचन ॥ स्वमाताकुरुतेतेषांतेपितस्याश्चकुर्वते ॥ तथा । ब्राह्मणेननकर्त्तव्यंशूद्रस्यत्वौर्द्धदैहिकं ॥ शूद्रे
णवाब्राह्मणस्यविनापारशवात्क्वचित् ॥ पारशवस्तु ॥ यंब्राह्मणस्तुशूद्रायांकामादुत्पादयेत्सुतम् ॥ ऊढायांवाप्यनूढायांसवैपारशवःम
तः ॥ शूद्रस्यत्वब्राह्मणभार्याजातस्यपुत्रस्य पितृश्राद्धेपौनर्भवत्वादधिकारः । क्षतायांवाऽक्षतायांवापौनर्भवइतिवचनात् । तथा । अपुत्रा

शुयनंभर्तुः पालयंती व्रतोस्थिता । पत्न्येवदद्यात्तत्पिंडंकृत्स्नमथलभेतच ॥ अत्रचप्रकरणे । अपुत्रस्यचयापुत्रीसापिपिंडप्रदाभवेत्
तस्यापिंडान्दशैतान्वाएकादेनैवानिःक्षिपेदित्यादिवाक्यानिपुत्राभावेदुहितुरधिकारबाधंकानीतिरत्नाकरेव्यवस्थापितं । तच्चश्राद्धक
ल्पतरुस्मृतिसारकृतोर्नानुमतं । ताभ्यांसिद्धवत्पुत्राभावेपत्न्यास्तदभावेसहोदरस्येत्येवमेवालिखनात् । व्यवहारोपितदुभयानुसारी ।
अतोव्यवहारानुरोधेनरत्नाकरालिखितमप्युपेक्षितं । अत्रचापुत्रस्यचयापुत्रीत्यादिवाक्यानिसपिण्डाद्यभावेदुहित्रधिकारबाधकानीतिव्य
वस्थापयितव्यं । यत्रतुव्यवहारविरोधोनापततितत्रयथारत्नाकरमेवव्यवस्था । मार्कण्डेयपुराणे । स्त्रीणामप्येवमेवैतदेकोद्दिष्टमुदा
हृतं । सपिंडीकरणंतासांपुत्राभावेनविद्यते ॥ प्रतिसंवत्सरंकार्यमेकोद्दिष्टंनरैःस्त्रियः । मृताहनियथान्यायंनृणांयद्वद्दिहोदितं ॥ स्त्री
णामप्येवमेवेतियाद्दशेनसंबन्धेनपितृव्यत्वादिनापुरुषाणामेकादशाहादिताद्दशेनसंबन्धेन पितृव्यपत्नीत्वादिनास्त्रीणामपितत्कार्यमित्य
र्थः । तदेषप्रकरणार्थः । मृतस्यत्रिविधाक्रियाभवति । पूर्वामध्यमाउत्तराचेति । तत्र दाहमारभ्याशौचांतंयावत्पिंडदानादिकाक्रि
यापूर्वाक्रिया । अशौचापगमानंतरमेकादशाहादिसपिंडनपर्यन्तामध्यमा । तदूर्ध्वमेकोद्दिष्टरूपाउत्तरा । तत्रत्रयोदशविधानामपिपुत्रा
णांत्रिविधासुक्रियास्वाधिकारः । तेषुचौरसः श्रेष्ठः । तदभावेपुत्रिकापुत्रः ततः पूर्वपूर्वाभावेउत्तरोत्तरोधिकारी । तेच औरसपुत्रि
कापुत्रक्षेत्रजकानीनसहोढगूढोत्पन्नपौनर्भवापविद्धदत्तक्रीतकृत्रिमस्वयमुपगतपारशवाः । तत्रचाविभक्तानामविभक्तानांपुत्राणांमध्येपूर्वा
यांमध्यमायांचक्रियायांयोग्यस्यज्येष्ठस्यैवाधिकारः । ज्येष्ठस्यक्षतादिनाऽनधिकारे नियतसमयकर्तव्येष्वेकादशाहादिषुकनिष्ठस्याप्य
धिकारः । उत्तरक्रियायांतुसर्वेषामधिकारः । पुत्राभावेपौत्रोधिकारीतदभावेप्रपौत्रः तदभावेपत्नी तदभावेसहोदरः कनीयान् तदभावे

ज्येष्ठः तदभावेपितातदभावेभ्रातृपुत्रः तदभावेपूर्वक्रियायांमध्यमाक्रियायांसपिण्डाऽधिकारः. तदभावेदुहिता तदभावेसकुल्याः तद
भावेमातृसपिण्डाः तदभावेमातृसकुल्याः कुलद्वयाभावेमातरः तदभावेयथाकथंचित् परिगृहीताः स्त्रियः तदभावेएकसार्थप्रयाताः तद
भावेराजोद्देशेनधनग्राहकोधिकारीपितृहीनौपौत्रप्रपौत्रौ सपुत्रयोरपिपितामहप्रपितामहयोः 'पार्वणे श्राद्धेऽधिकारिणौ । मृतस्यकन्याविवा
हेकन्यादाताप्याभ्युदयिकेधिकारी '। असमाप्तषड्वर्षस्यपूर्वक्रियामात्रंतत्रभ्रातृपित्रादयोधिकारिणः । असमाप्तद्विवर्षस्यपूर्वक्रियापि
नास्तिकिन्तुभूमिनिखननमात्रं । स्त्रियाअपिद्विवर्षाभ्यंतरेभूमिखननमात्रम् । तदूर्ध्वंविवाहात्पूर्वंपूर्वक्रियामात्रम् । तत्रपिताधि
कारीतदभावेभ्रात्रादिः ऊढायाःत्रिविधासुक्रियासुपुत्रोधिकारी तदभावेपतिः तदभावेसपत्नीपुत्रः तदभावेस्नुषातदभावेपौत्रः तदभावे
प्रपौत्राः तदभावेसपिंडाः तदभावेसकुल्याः तदभावेपितृसपिंडाइतिश्राद्धमंजरी । शूद्रस्यापरिणीतस्यद्विवर्षादूर्ध्वंपूर्वक्रियामात्रम्
तत्रभ्रात्रादिरधिकारी । परिणीतस्यात्रिविधाक्रियातत्रपुत्रादिरधिकारीपूर्ववत् । केचित्तुअसमाप्तषड्वर्षस्यत्रैवर्णिकस्यस्त्रीशूद्रयोश्चापरिणी
तयोस्त्रिविधापिक्रिया अनुग्रहादिनानत्वावश्यकीत्याहुरिति । श्राद्धकल्पस्मृतिसारौ '। गुरुकुलस्थितस्यशिष्यस्यभ्रातृपित्राभा
वेगुरुराधिकारी गुरोरपिपुत्रपत्नीभ्रातृहीनस्यशिष्यःयजमानस्यान्याभावेऋत्विगिति ॥ अथानधिकारिणः ॥ तत्रयाज्ञवल्क्यः ॥
नब्रह्मचारिणःकुर्युरुदकंपतितानच । पाखण्डयमाश्रिताःस्तेनानव्रात्यानविकर्मिणः । गर्भभर्तृद्रुहश्चैवसुराप्यश्चैवयोषितः । उदकशब्दे
नात्रप्रकरणेदाहादिकमपिलक्ष्यतेसाहचर्यात् । पाखण्डोवेदप्रामाण्यास्वीकर्त्तास्तेनाअत्रब्राह्मणसुवर्णातिरिक्तविषयकचौर्य्यवृत्तयः ब्राह्म
णसुवर्णहारिणःपतितत्वेनैवग्रहणात् । व्रात्याःस्वस्वोपनयनकालेऽकृतोपनयनाः विकर्मिणःआलस्यादश्रद्धयाचस्वकर्मत्यागिनो

निंदितकर्मकर्त्तारश्च सुराप्यइतिमद्यपायिकाःएतच्चत्रैवर्णिकस्त्रीविषयं । एतेब्रह्मचारिप्रभृतयोऽन्यस्योदकंनकुर्युः । मनुः । आदिष्टीनो
दकंकुर्य्यादाव्रतस्यसमापनात् । समाप्तेतूदकंकृत्वात्रिरात्रेणैवशुद्ध्यति । आचार्यंस्वमुपाध्यायंमातरंपितरंगुरुम् । निर्हृत्यतुव्रतीप्रेतंनव्र
तेनावियुज्यते ॥ आदिष्टीब्रह्मचारीव्रतसमाप्तिर्ब्रह्मचर्यस्नानंसमावर्त्तनंआचार्यउपनीयसमवेदाध्यापकः । गुरुस्तुउपनीयसंपूर्णवेदाध्या
पकः उपनीयवेदैकदेशाध्यापकश्च । उपाध्यायोयत्किञ्चिदध्यापकः । एतेषांमातापित्रोश्चवहनदहनादावन्याभावेब्रह्मचारिणोदोषोनभव
ति । वसिष्ठः । ब्रह्मचारिणः शवकर्मणाव्रतान्निवृत्तिरन्यत्रमातापित्रोर्गुरोर्वा । गुरुशब्देनाचार्योपाध्याययोरपिग्रहणं । अथोदकाद्यनर्हाः ।
तत्रमनुः । वृथासंकरजातानांप्रव्रज्यासुचतिष्ठताम् । आत्मनस्त्यागिनांचैवनिवर्त्तेतोदकक्रिया ॥ वृथाशब्दःसर्वत्राभिसंबद्ध्यते वृथासंक
रजाताअयथाभिधानसंकरजाताः । वृथाप्रव्रज्यासुवेदाविहितप्रवज्यासु । वृथाआत्मत्यागिनः शास्त्राविहितशरीरत्यागकर्त्तारः ।
तथा । पाखंडमाश्रितानांच युवतीनांचकामतः । गर्भभर्तृद्रुहांचैवसुरापीनांचयोषितां ॥ उदकक्रियानिवर्त्ततइतिसंबन्धः । अथ
पुत्रलक्षणम् । तत्रनारदः । औरसःक्षेत्रजश्चैवपुत्रिकापुत्रएवच । कानीनश्चसहोढश्चगूढोत्पन्नस्तथैवच । पौनर्भवोपविद्ध
श्चदत्तःक्रीतःकृतस्तथा ॥ स्वयंचोपगतःपुत्राद्वादशैतेप्रकीर्तिताः ॥ याज्ञवल्क्यः । पिण्डदोंशहरश्चैषांपूर्वाभावेपरःपरः ॥ तत्रौरसलक्षणं ।
तत्रविष्णुः । अथद्वादशपुत्राभवन्ति । स्वेक्षेत्रेस्वयमुत्पादितः प्रथमपुत्रः । मनुः । संस्कृतायांचभार्यायांस्वयमुत्पादयेत्तुयम् । तमौरसंवि
जानीयात्पुत्रंप्रथमकल्पितं ॥ देवलः ॥ सवर्णायांसंस्कृतायांस्वयमुत्पादितमौरसंपुत्रंविद्यादिति । सवर्णासमानवर्णा । अत्रसावर्ण्यंद्वि
जातित्वेनविवक्षितं । यद्विब्राह्मणत्वादिनैवसावर्ण्यंविवक्षितंस्यात्तदाब्राह्मणस्यविवाहितयोःक्षत्रियावैश्ययोः स्वयमुत्पादितः सुतऔरसो

नस्यात् पुत्रान्तरेषुतस्यांतभावोनास्त्येव । अतस्तस्यौरसत्वमेव । तेनशूद्रामात्रस्यागायसवर्णग्रहणमितिपारिजातः । अयमर्थः विवाहि
तासुब्राह्मणक्षत्रियवैश्यजातीयासुभार्यासुस्वयमुत्पादितः पुत्रऔरसः । अथक्षेत्रजलक्षणम् । विष्णुः । नियुक्तायांसपिण्डेनोत्तमवर्णेनो
त्पादितः क्षेत्रजोद्वितीयः । मनुः । यस्तल्पजःप्रमीतस्यक्लीबस्यव्याधितस्यवा । स्वधर्मेणनियुक्तायांसज्ञेयः क्षेत्रजःसुतः ॥ तल्पंक
लत्रम् तत्रजातः प्रमीतस्यमृतस्यक्लीबस्यनपुंसकस्यव्याधितस्यअपत्योत्पादनप्रतिबन्धकदुश्चिकित्स्यरोगवतः स्वधर्मेणघृताभ्यक्तत्वा
दिना नियुक्तायांपतिश्वशुरादिभिरनुज्ञातायां । तदयमर्थः । मृतस्यवाक्षमस्यवाभार्यायांपतिश्वशुरादिनियोगेनदेवरेणान्येनवो
त्कृष्टजातीयेनघृताभ्यङ्गादिमताउत्पादितःक्षेत्रजःपुत्रःस्वक्षेत्रिणएव । यदातुनिरपत्योदेवरादिरत्रयदपत्यंभविष्यतितत् क्षेत्रिणो
ममचसमानंभविष्यतीतिव्यवस्थया अपत्यंउत्पादितवांस्तदासपुत्रोद्वयोरपिबीजिक्षेत्रिणोः पिण्डप्रदोभवति । तदाहमनुः ।
क्रियाभ्युपगमात्वेतद्बीजार्थंयत्प्रदीयते । तस्येहभागिनौदृष्टौबीजीक्षेत्रिकएवच ॥ अथपुत्रिकापुत्रलक्षणं । विष्णुः । यस्त्वस्याः
पुत्रःसमेपुत्रोभवेदिति । यापित्रादत्तासापुत्रिकापुत्रविधिनाऽप्रतिपादितापितृभ्रातृहीनापुत्रिकेत्र । वसिष्ठः । अभ्रातृकांप्रदास्या
मितुभ्यंकन्यामलंकृतां ॥ अस्यांयोजायतेपुत्रःसमेपुत्रोभविष्यति । मनुः । अपुत्रोनेनविधिनासुतांकुर्वीतपुत्रिकाम् । यदपत्यं
भवेदस्यांतन्ममस्यात्स्वधाकरम् ॥ स्वधाकरंश्राद्धादिकरमित्यर्थः तदेवंव्यवस्थयायापित्रादत्ताचिंतितासतीयाच नदत्तासापिपुत्रि
कातस्याःपुत्रःपुत्रिकापुत्रः । औरसानुवृत्तौयाज्ञवल्क्यः । तत्समःपुत्रिकापुत्रःऔरसतुल्यइत्यर्थः । सचमातामहस्यपिण्डप्रदः ।
तथाहदेवलः । अकृतावाकृतावापियाविन्देत्सदृशात्सुतं । पत्नीमातामहस्तेनदद्यात्पिण्डंहरेद्धनं ॥ मातामहस्येतिशेषः । यदातुपुत्रि

कापुत्रस्यापितृमातामहोनिरपत्यस्तदातयोरपिश्राद्धकारी । तथाहदेवलः । तत्तुल्यःपुत्रिकापुत्रोदायादःसोथवाभवेत् । पितुर्मा
तामहस्यापिनिरपत्यस्यपुत्रवत् ॥ मनुः । मातुःप्रथमतःपिण्डंनिर्वपेत्पुत्रिकासुतः । द्वितीयन्तुपितुस्तस्यास्तृतीयंतुपितुःपितुः ॥
अथपौनर्भवलक्षणम् । विष्णुः । चतुर्थःपौनर्भवः । यातुपत्यापरित्यक्ताविधवास्वेच्छयाथवा । उत्पादयेत्पुनर्भूत्वासपौनर्भवउच्यते ॥
पुनर्भूत्वापुनःपुरुषान्तरेणसवर्णेनात्मानंविवाह्ययंपुत्रमुत्पादयेत् सपौनर्भवः । याज्ञवल्क्यः । क्षतायांवाक्षतायांवाजातःपौनर्भवः
सुतः । कात्यायनः । क्लीबंविहायपतितंयापुनर्लभतेपतिम् । तस्यांपौनर्भवोजातोव्यक्तमुत्पादकस्यसः । अथकानीनः । तत्र
विष्णुः । कानीनःपंचमः । तथा । अप्रत्तादुहितायस्यपुत्रंविन्देततुल्यतः । पुत्रीमातामहस्तेनदद्यात्पिण्डंहरेद्धनम् । तथा ।
यापितृगृहेऽसंस्कृताकामादुत्पादयेत्सुतम् सकानीनोमातामहस्यभवतीत्याह । तदेवंकन्यादशायामेवसवर्णेनयः पुत्रउत्पादितः सकानी
नकः । समातामहस्यैवश्राद्धकारी । यदितुतस्याःपरिणेतापिनिरपत्योभवतितदातस्यापिश्राद्धकारीसः । तथाचब्रह्मपुराणे ।
अदत्तायांचयोजातःसवर्णेनपितुर्गृहे । सकानीनःसुतस्तस्ययस्मैसादीयतेपुनः । यदितुकानीनस्यमातामहोनिरपत्यः कन्यापरिणे
ताचनिरपत्यस्तदाद्वयोरपिसश्राद्धकारीति पारिजातः । अथगूढोत्पन्नः । विष्णुः । गूढोत्पन्नःषष्ठोयस्यतल्पजस्तस्यासौ । मनुः । उत्पद्यतेगृहे
यस्यनचज्ञायेतकस्यचित् । सगृहेगूढउत्पन्नस्तस्यस्याद्यस्यतल्पजः । तल्पं दाराः । यस्यतल्पजोयस्यभार्यायांजातस्तत्पुत्रः
सभवतिबीजिनोऽपरिचयान्मातृजातीयश्चासौयदिहीनजातीयसंगमशंकानभवतितच्छंकायांकार्यानुपयुक्तएवसभवतीतिरत्नाकरः । अथ
सहोढः । विष्णुः । सहोढःसप्तमःपुत्रः । मनुः । यागर्भिणीसंस्क्रियतेज्ञाताज्ञातापिवासती । वोढुःसगर्भोभवतिसहोढइतिचोच्य

ते ॥ विवाहकालीनहोममंत्रैर्यागर्भिण्येवसंस्क्रियतेतत्सुतःसहोढःसचपरिणेतुरेवभवति । अथदत्तकः । विष्णुः । दत्तकश्चाष्टमः सचमात्रापित्रावायस्यदत्तस्तस्यस्यादितिशेषः । तथा । मातापितरौदद्यातांयमद्भिःपुत्रमापदि । सदृशंप्रीतिसंयुक्तोसज्ञेयोदत्रिमःसुतः ॥ आपादिपुत्रगृहीतुः पुत्रासंपत्तौसदृशंसवर्णयंमातापितरौप्रीतिसंयुक्तौदद्यातांसदात्रिमोदत्तकः सुतः प्रीतिसंयुक्तावित्यभिधानात् भय लोभादिनादानानिषेधोबोध्यते । वासिष्ठः । शुक्रशोणितसंभवोमातापितृनिमित्तकस्तस्यप्रदानविक्रयत्यागेषुमातापितरौप्रभवतः । नत्वेकंपुत्रंदद्यात्प्रतिगृण्हीयाद्वासहिसंतानायपूर्वेषांनस्त्रीपुत्रंदद्यात्प्रतिगृण्हीयाद्वाअन्यत्रानुज्ञानाद्भर्तुः । पुत्रंप्रतिगृहीष्यन्बन्धूनाहूयरा जानिचावेद्यनिवेशनस्यमध्येचव्याहृतिभिर्हुत्वाऽदूरेबान्धवसन्निकृष्टमेवप्रतिगृण्हीयात् । अस्यार्थः । मातृपित्रोः पुत्रदानादाव धिकारः पत्यौसतिस्त्रियाः पत्यननुमत्यापुत्रदानेऽनाधिकारः । पत्यनुमत्यातुपुत्रदानेऽधिकारः । पत्यभावेनाधिकारएव । एकपुत्रस्यदा नादौद्वयोरप्यनधिकारः । अथप्रतिगृहीताप्रथमतएवबंधूनाहूयराज्ञेचकथयित्वास्वगृहमध्येस्वगृह्योक्तविधिनाअग्निस्थापनादिकृत्वा आघाएवाज्यभागमहाव्याहृतिसर्वप्रायाश्चित्तप्राजापत्यस्विष्टकृद्धोमान् नित्यान्कृत्वातत्रनैमित्तिकंव्याहृतिहोमंकुर्यात् । ततोहोमान्तर वत्संस्रवप्राशनादिपूर्णहोमान्तंकृत्वापुत्रंप्रतिगृण्हीयात् । अदूरबांधवसन्निकृष्टंस्वजनभूतमित्यर्थः । तदभावेसन्निकृष्टमेव । एवशब्दोऽप्यर्थः । तेनतदभावेऽसन्निकृष्टमपीत्यर्थः । अत्रराजनिबंधुषुचनिवेदनंदृष्टार्थमेवतस्यधनग्रहणेनिःशंकत्वार्थंनत्वदृष्टाऽर्थमतोनिवेदनेतेषांधर्मवि शेषः । एवंचव्याहृतिहोमस्यपुत्रप्रतिग्रहांगत्वात् । व्याहृतिमन्त्रपाठेचस्त्रीशूद्रयोरनधिकारात् स्त्रीशूद्रयोर्दत्तकः पुत्रोनभवतीत्येवेति । मनुः । ऋक्थगोत्रेजनंयितुर्नहरेद्दत्रिमः सुतः । ऋक्थगोत्रानुगः पिण्डोव्यपैतिददतः स्वधा ॥ अस्यार्थः । दत्तस्यजनकगोत्रंनावतिष्ठतेनच

तद्धनगोत्रग्राहकत्वं च भवति । अस्यार्थः । दत्तस्य जनकगोत्रंनावतिष्ठते नचतद्धनंतदपत्यार्थंतापित्रोर्येमंतिकात् । सतुक्रीतः सुतस्त स्वसदृशोऽसदृशोऽपिवा । अस्यार्थः । मातापित्रोःसकाशात् यंक्रीणीयात्सक्रीतः पुत्रः क्रेतुरेवपिण्डप्रदः सदृशः सवर्णः असदृशोऽ सवर्ण इति पारिजातः । प्रकाशकारस्तु अत्रयद्यप्यसदृश इतिसामान्यतः श्रूयते तथापिहीनजातीयेनोत्तमजातीयः पुत्रोन क्रेतव्यः उत्तमजातीयेनहीनजातीयः पुत्रः क्रेतव्यः सजातीयएवपुत्रः क्रेतव्यः सदृशासदृशत्वंगुणापेक्षयेतिमेधातिथिराह । अथस्वयमुपगतः । विष्णुः । स्वयंचोपगतोदंशमः सचयस्योपगतस्तस्य । पुत्रइतिशेषः । मनुः । मातापितृविहीनोयस्त्यक्तोवास्या दकारणात् । आत्मानंस्पर्शयेद्यस्तुस्वयंदत्तस्तुसस्मृतः । अकारणादल्पापराधान्मातापितृभ्यांत्यक्तोमातापितृविहीनोवायःस्वय मात्मानंस्पर्शयेद्द्यात् । तवाहंपुत्रोभवामीत्येवंप्रकारेणस्वयमुपागतःपुत्रोभवति प्रतिग्रहीतुरेवपिण्डप्रदः । अथापविद्धः । विष्णुः । अपविद्ध स्त्वेकादशःसमात्रापित्रावापरित्यक्तोयेनगृहीतस्तस्य । पुत्रइतिशेषः । मनुः ॥ मातापितृभ्यामुत्सृष्टंतयोरन्यतरेणवा । यंपुत्रंप्रतिगृण्ही यादपविद्धस्तुसस्मृतः । मातापितृभ्यांपातित्यव्यतिरेकेणदुर्गत्याभरणासामर्थ्यादिनापरित्यक्तोयेनपुत्रत्वेनगृहीतस्तस्यसोपविद्धः पुत्रोभवति । अथकृत्रिमः । मनुः । सदृशंयंप्रकुर्वीतगुणदोषविचक्षणम् । पुत्रंपुत्रगुणैर्युक्तंसज्ञेयःकृत्रिमःसुतः ॥ अत्रापिसदृशःसदृशगुणइतिमे धातिथिः । गुणदोषविचक्षणम् मातापित्रोरौर्ध्वदैहिककरणाकरणेगुणदोषज्ञम् पुत्रगुणैःशुश्रूषादिभिर्युक्तंएवंभूतंयंपुत्रंकरोतिसकृत्रि मःपुत्रःसंचपुत्रत्वकरस्यापिपिण्डप्रदःनिजपित्रादीनांचपिण्डप्रदत्वंतस्यातिष्ठत्येव । तत्रप्रकारः । शुभसमयेपुत्रकर्तास्नातःकिञ्चिदभी ष्टंवस्तुदत्वात्वंममपुत्रोभवेतिवदेत् । तवपुत्रभूतोस्मीतिसप्रतिवदेत् । वस्तुदानमत्राचारप्राप्तंनत्वावश्यकं । पुत्रत्वकरणेचतदुभयोरनुम

त्तिलेनप्रयोजिकातेनस्वानपाविशेषस्यनपुरस्कारः । अथशूद्रापुत्रः । विष्णुः । यत्रकचनोत्पादितस्तुद्वादशः । यत्रकचनेतिक्रमयामनुलोमा
वाशूद्रायामित्यर्थः । एवमेवरत्नाकरः । तच्चशूद्रापुत्रस्यद्वादशत्वंकल्पांतरमेव । वस्तुतस्त्रयोदशत्वमेवकृत्रिमस्येवनद्युपुत्रेषुद्वादशत्वे
नपाठात् । विष्णुस्मृतौतुकृत्रिमःपुत्रःपरिगणितएवनेतितत्रशूद्रापुत्रस्यद्वादशत्वं । मनुः । यं ब्राह्मणस्तु शूद्रायां कामादुत्पादयेत्सुतं । सपा
रयन्नेवशवस्तस्मात्पारशवःस्मृतः ॥ पारयन्नेवपितृत्वाभिमतस्याकिंचिदुपकुर्वन्नेवाऽल्पोपकारित्वात् पारशवः । सचजनयितुःपिंडप्रदःपर्णया
नूढशूद्राजातस्यपुत्रस्यजनकशूद्रश्राद्धादावतितरामावेकारः । यत्रचशूद्रस्याविवाहिताभार्यास्तितथाविधःपुत्रश्चतत्रापिसपुत्रएवा
धिकारीतिबृहस्पतिः । पुत्रास्त्रयोदशप्रोक्तामनुनायेतुसर्वशः । संतानकारणात्तेषामौरसःपुत्रिकस्तथा ॥ आज्यं विना यथा तैलं
सद्भिः प्रतिनिधिःस्मृतः । तथैकादशपुत्रास्तुपुत्रिकौरसयोर्विना ॥ अत्र च यद्यपिक्षेत्रजादयः कथितास्तथापिक्षेत्रजापौनर्भवका
नीनसहोढगूढोत्पन्नाःकलौनसंभवंतितेषांनिंदितत्वेनाभिधानात् । तथाचबृहस्पतिरेव । अनेकधाकृताःपुत्राऋषिभिर्येपुरातनैः ॥
न शक्यास्तेधुना कर्तुंशक्तिहीनैर्नरैस्तत्क्षमं । तत्रानिंदितान्परिगणयति ॥ क्षेत्रजोगर्हितः सद्भिस्तथापौनर्भवः सुतः । कानीनश्च सहो
ढश्च गूढोत्पन्नस्तथैवच ॥ औरसपुत्रिकापुत्रयोरभावेदत्तकादयस्त्वनुज्ञाताएव । तथाचसएवाह । दत्तोपविद्धः क्रीतश्चकृतःशौद्र
स्तथैवच ॥ जातिशुद्धाः कर्मशुद्धामध्यमास्तेसुतामताः ॥ शौद्रःशूद्रापुत्रः इतित्रयोदशपुत्राणांलक्षणम् ॥ अथासापिण्डादिलक्षणं
तत्रमनुः । सपिंडतातुपुरुषेसप्तमेविनिवर्त्तते ॥ समानोदकभावश्च जन्मनाम्नोरवेदने ॥ सप्तमेसत्यनन्तरंसापिण्डतानिवर्ततेइत्यर्थः । शंख
लिखितौ । सपिंडिता तु सर्वेषां गोत्रतःसाप्तपौरुषी ॥ पिंडश्चोदकदानं चाशौचाशौचंतदानुगं ॥ गोत्रतःसंतानतःतदानुगंसमंताद्वानेत्या

मनुगतंतदानुगंतेनसप्तमपुरुषावधिसंतानजानांपरस्परंसापिंडतेत्यर्थः । ब्रह्मपुराणे । सर्वेषामेववर्णानांविज्ञेयासांतपौरुषी सपिंडतातत:पश्चात्समानोदकधर्मता ॥ ततःकालवशात्तत्रविस्मृतेजन्मनामाभिः । समानोदकसंज्ञातुतावन्मात्रापिनश्यति ॥ सुमंतुः । ब्राह्मणानामेकपिंडस्वधानामादशमात् धर्मविच्छित्तिर्भवतिआसप्तमात् ऋक्थविच्छित्तिर्भवतिआतृतीयात्स्वधाविच्छित्तिर्भवति अन्यथापिंडशौचक्रियाविच्छेदात्ब्रह्महतुल्योभवतिएकःपिंडस्वधासंबंधीयेषान्तेएकपिंडस्वधाः तेषांदशममवधीकृत्य परतोधर्मनिवृत्तिरशौचादिनिवृत्तिः । सप्तममवधीकृत्यपरतोदायनिवृत्तिः । तृतीयमवधीकृत्यस्वधानिवृत्तिः श्राद्धादिनिवृत्तिः अन्यथाचतुर्थादर्वाक् पिंडानिवृत्तौसप्तमादर्वागृक्थविच्छित्तौएकादशादर्वाक्अशौचनिवृत्तौपापवान्भवतीत्यर्थः । मत्स्यपुराणे । लेपभाजश्चतुर्थाद्याः पित्राद्याःपिंडभागिनः ॥ पिंडदः सप्तमस्तेषांसापिंड्यंसाप्तपौरुषं ॥ इदंप्रकारांतरमेव । कूर्मपुराणे । अप्रत्तानांतथास्त्रीणांसापिंड्यंसाप्तपौरुषं । प्रत्तानांभर्तृसापिंड्यंप्राहदेवः पितामहः ॥ अप्रत्तानामविवाहितानांप्रत्तानांविवाहितानां । एवंचरत्नाकरलिखितेतद्वाक्यपर्यालोचनयायद्वसिष्ठवचने प्रत्तानांस्त्रीणां त्रिपुरुषमितिसापिण्ड्यंप्रतिपादितं तद्वाग्दानोत्तरविषयमितिप्रतिभातिकन्यानामपिसप्तपुरुषावधिसापिंडत्वव्यवहारात् । अत्रचप्रकरणार्थः । अशौचभागिनांसमंमृतस्यच प्रसूतस्यच वीजिपर्यन्तमगणनयासप्तपुरुषाभ्यन्तरत्वेसपिंडता भवति । दशमपुरुषाभ्यन्तरत्वेसमानोदकताभवति । सैवसकुल्यता । ततःपरमस्मात्पुरुषात् अयंजातइतिज्ञानाभावे । अस्मत्कुलजाइत्येवमाकारज्ञानमात्रगोचरागोत्रजाइत्युच्यन्तेदशमपुरुषादन्यसंज्ञायमानजन्मनामत्वेवान्धवपदव्यपदेशः । पातित्यशौचविधानंचप्रकरणांतरादेवेति ॥ इतिरुद्रधरकृतौशुद्धिविवेकेऽधिकारिनिरूपणोद्देशोनामपरिच्छेदः ॥ २ ॥ अथदेहादिद्रव्यशुद्धिः

तत्रप्रथमंदेहशुद्धिः । यमः । सत्यंशौचंतपःशौचंशौचमिंद्रियनिग्रहः ॥ सर्वभूतदयाशौचंशौचमद्भिश्चपंचमं ॥ बृहस्पतिः । परापवाद
श्रवणंपरस्त्रीणामदर्शनं ॥ एतच्छौचंश्रोत्रदृशोर्जिह्वाशौचमपैशुनं ॥ प्राणिनामवधोऽस्तेयंशुचित्वंपादहस्तयोः ॥ असंश्लेषाणांनिवृत्तिः
शौचमित्यर्थः । मनुः । विष्णुः । सर्वेषामेवशौचानामर्थशौचंपरंस्मृतं ॥ योऽर्थेशुचिर्हिसशुचिर्नमृद्वारिशुचिःशुचिः ॥ मनुः । वसाशु
क्रमसृङ्मज्जामूत्रंविट्कर्णविण्णखाः ॥ श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः ॥ कर्णविट्कर्णमलं । नखास्तुकृत्ताएवमलं
दूषिकानेत्रमलं ॥ बौधायनः । आददीतमृदोयश्चषट्सुपूर्वेषु शुद्धये ॥ उत्तरेषुचषट्स्वद्भिःकेवलाभिर्विशुद्ध्यति ॥ पुरीषो
त्सर्गेविष्णुपुराणं । एकालिंगे गुदेतिस्रस्तथावामकरेदश ॥ उभयोःसप्तदातव्यामृदः शुद्धिमभीप्सता ॥ उभयोर्हस्तयोर्मि
लितयोः वामहस्तपृष्ठेषट्मृत्तिकादेयाः । षट्पृष्ठतइतिहारीतवचनात् । यमः । तिस्रस्तुपादयोर्देयाःशुद्धिकामेननित्यशः ।
एतच्चप्रतिपादं । तथा । तिस्रस्तुमृत्तिकादेयाः कृत्वातुनखशोधनं । हस्तद्वयइतिशेषः । केवलमूत्रोत्सर्गेदक्षः । एकालिंगेतु
सव्येत्रिरुभयोर्द्वयंस्मृतम् ॥ सव्येहस्तेउभयोर्हस्तयोरित्यर्थः । ब्रह्मपुराणे । पादयोर्द्वेगृहीत्वाच सुप्रक्षालितपाणिना ॥ आच
म्यतुततःशुद्धःस्मृत्वाविष्णुंसनातनं । पादयोर्द्वेप्रतिपादमेकैकामृद्देया । बौधायनः । मूत्रवद्रेतसःसमुत्सर्गे शौचमितिशेषः ।
शंखः । मृत्तिकातुसमुद्दिष्टात्रिपर्वापूर्य्यतेयया ॥ इदंमृत्तिकापरिमाणकथनंगुदंविहाय । तत्रतुदक्षः । अर्द्धप्रसृतिमात्रातुप्रथमं
मृत्तिकास्मृता । द्वितीयाचतृतीयाचतदर्द्धंपरिकीर्तिता ॥ ऋष्यशृङ्गः । यस्मिन्स्थानेकृतंशौचंवारिणातत्तुशोधयेत् ॥ मनु
स्तुभवेत्तस्यमृत्तिकांयोनशोधयेत् ॥ मृत्तिकासंख्यामुक्त्वामनुः । एतच्छौचंगृहस्थानांद्विगुणंब्रह्मचारिणां ॥ त्रिगुणंतुवनस्थानां

यतीनांचचतुर्गुणं ॥ आपस्तंबः । अद्भिःशौचंयथाप्रोक्तंनिश्यर्द्धंतुतदिष्यते ॥ पथिपादस्तुविज्ञेय आर्त्तःकुर्याद्यथाबलं ॥ पथी
तिपथमार्गेविष्ठलंबेसतिचौरादितोऽनिष्टशंकाभवतितत्परं । आर्त्तोरोगी । यमः । सकर्दमांस्तुरथ्यांस्तुप्रविश्यग्रामसंकरं ॥ जंघाभ्यां
मृत्तिकास्तिस्रः पद्भ्यांतुद्विगुणाःस्मृताः ॥ अथप्रक्षालनादिशुद्धिः । अंगिराः । ऊर्ध्वंनाभेः अपवित्रद्रव्येणविष्ठादिनाकरौमुक्त्वायदं
गमुपहन्यतेतत्रस्नानम् । अधस्तात्तुक्षालनेनैवशुद्ध्यति । इंद्रियेचप्रविष्टंस्यादमेध्यंयदिकुत्रचित् ॥ मुखेपिसंस्पर्शगतंतत्रस्नानंवि
शोधनं । विष्णुः । नाभेरधस्तात्प्रबाहुषुचकायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदंगंप्रक्षाल्याचम्यातंद्रितःशुद्ध्येत । अन्यत्रोप
हतोमृत्तोयैस्तदंगंप्रक्षाल्यस्नानेन । चक्षुष्युपहतउपोष्यस्नात्वापंचगव्येनदशनच्छदोपहतश्च । प्रबाहुःकफोणेरधोभागःपंचगव्येनप्रा
शितेनशुद्ध्येदितिशेषः । ऋष्यशृंगः । मद्यविण्मूत्रविप्रुड्भिःसंस्पृष्टंमुखमंडलं ॥ मृत्तिकागोमयैर्लेपात्पंचगव्येनशुद्ध्यति ॥ विप्रु
षोऽत्यन्तमल्पाबिंदवः । शांतातपः । रजकश्चर्मकृच्चैवव्याधजालोपजीविनः ॥ चेलनिर्णेजकश्चैवनटःशैलूषकस्तथा ॥ मुखेभग
स्तथाश्वाचवनिताःसर्ववर्णगातथा ॥ चक्रीध्वजीवध्यघातीग्रामकुक्कुटशूकरौ ॥ एभिर्यदंगंस्पृष्टंस्याच्छिरोवर्जंद्विजातिषु ॥ तोयेनक्षा
लनंकृत्वा आचांतःशुचितामियात् ॥ रजकोवस्त्ररंजनकर्तानटोनर्त्तकःशैलूषोनाटकाद्यभिनेतामुखेभगोमुखयोनिरितिप्रसिद्धः चक्री
तैलिकः ध्वजीशौंडिकः वध्यघातीचोरादिवधेनियुक्तः । अत्रशिरःशब्देननाभेरूर्ध्वंलक्ष्यते । पैठीनसिः । उच्छिष्टरेतोविण्मू
त्रसंस्पृष्टोमृज्याचम्यप्रयतोभवतीति त्रिःप्रक्षाल्यचतंदेशं । अत्रत्रिःप्रक्षाल्याचम्यप्रयतोभवतीत्यन्वयः । उच्छिष्टंमानवंस्पृष्ट्वा
भोज्यंवापितथाविधं ॥ तथैवहस्तौपादौचप्रक्षाल्याचम्यशुद्ध्यति ॥ भोज्यंतथाविधमुच्छिष्टमेव भक्तादि ॥ यदंभःशौचनिर्मुक्तंक्षितिं

प्राप्यविनश्यति ॥ प्रक्षाल्याशुचिविलिप्तचर्मसंस्पृश्यनाचम्यशुद्ध्यति ॥ अशौचवर्ज्यादितभूमिसंस्पृश्यमलाद्यशुचिलिप्ताङ्गप्रक्षाल्याचम्यशुद्ध्य
तिइतिवाक्यार्थः । बौधायनः । नीवीं विस्रस्यपरिधायोपस्पृशेदाचामेदित्यर्थः ॥ विष्णुः । पंचनखास्थ्यस्नेहंस्पृष्ट्वाचामेत् । चांडालम्ले
च्छभाषणेचपंचनखास्थिभक्ष्येतरपंचनखास्थि । आपस्तम्बः । रिक्तपाणिर्वयसउद्यम्याप उपस्पृशेत् । शक्तिविषयेनमुहूर्त्तमप्य
प्रयतःस्यात्रिक्तपाणिः शून्यहस्तोवयसेपाक्षिणे उद्यम्यपाणिमाचामेदित्यर्थः । हारीतः । देवताभिगन्तुकामआचामेत् । तथा । नो
तीरेद्वंदुपस्पृश्यनद्युपारगमनेपूर्वमाचामितव्यामित्यर्थः । यमः । उत्तीर्योदकमाचम्यावतीर्यापउपस्पृशेत् । एवंस्याच्छ्रेयसायुक्तोवरुण
श्चेनपूजितः ॥ मन्वाङ्गिरोबृहस्पतयः । सुप्त्वाक्षुत्त्वाथभुक्त्वाचनिष्ठीव्योक्त्वानृतंवचः ॥ पीत्वापोध्येष्यमाणश्चआचामेत्प्रयतोपिसन् ॥
क्षुत्त्वाच्छिक्कांकृत्वेत्यर्थः । अत्रशयनादिकृत्वाद्विराचमनं कर्त्तव्यम् । वेदाध्ययनपूर्वकालेचाद्विराचमनमित्यर्थः । वायुपुराणे ।
निष्ठीवनेतथाभ्यङ्गे तथापादावसेचने ॥ उच्छिष्टस्यचसंभाषादशुच्युपहतस्यच ॥ संदेहेषु च सर्वेषु शिखांमुक्त्वातथैवच ॥
विनायज्ञोपवीतेननित्यमेवमुपस्पृशेत् । उष्ट्रवायससंस्पर्शेदर्शनेचान्त्यजन्मनाम् ॥ निष्ठीवनंमुखेनश्लेष्मत्यागः निष्ठीवनादौकृते
आचमनम् । सन्देहेषुचाचमननिमित्तसंशयेषुचआचमनंकर्त्तव्यंशिखांमुक्त्वाविनायज्ञोपवीतेनेत्येताभ्यांशिखामोचनंयज्ञोपवीतत्या
गश्चाचमननिमित्तमुक्तं । तेनैतत्करणानंतरंपुनर्बद्धाशिखांधृत्वाचयज्ञोपवीतमाचमनीयमित्यर्थः । संवर्त्तः । चर्मारंरजकंवेणुधीवरं
नटमेवच । एतान्स्पृष्ट्वानरोमोहादाचामेत्प्रयतोपिसन् ॥ अथाचमनानुकल्पः ॥ मार्कण्डेयपुराणे । कुर्यादाचमनंस्पर्शंगोपृष्ठस्या
र्कदर्शनं ॥ कुर्वीतालंभनंवापिदक्षिणश्रवणस्यच ॥ यथाविभवतोह्येतत्पूर्वाभावे ततः परं ॥ नविद्यमानेपूर्वस्मिन्नुत्तरप्राप्तिरिष्यते ॥

वृद्धशातातपः । वातकर्मणिनिष्ठीव्यदंतश्लिष्टेतथानृते ॥ क्षुतेपतितसंभाषेदक्षिणंश्रवणंस्पृशेत् ॥ अग्निरापश्च देवाश्चचंद्रादित्यानिलास्त
था ॥ एतेसर्वेहिविप्राणां श्रोत्रेतिष्ठंतिदक्षिणे ॥ बौधायनः । आर्द्रंतृणंभूमिंवामेयंवाउपस्पृशेत् । अथाचमनापवादः । देवलः ।
भोजनेदंतलग्नानि निर्हृत्याचमनंचरेत् । दंतलग्नमसंहार्यंलेपंमन्येतदंतवत् ॥ नतत्रबहुशःकुर्याद्यत्नमुद्धरणेपुनः ॥ तत्रात्यं
तमशौचंस्यात्तृणवेधाद्व्रणेकृते ॥ आपस्तंबः । नश्मश्रुभिरुच्छिष्टोभवत्यन्तरास्पृशाद्दंतयावन्नहस्तेनोपस्पृशति । वसिष्ठः ।
दंतवद्दंतलग्नेषुयच्चाप्यंतर्मुखे भवेत् ॥ आचांतस्यावशिष्टंस्यान्निगिरन्नेवतच्छुचिः ॥ यच्चापीति आचमनानन्तरमपिप्रमाद
तोवशिष्टंयदन्नकणाद्युपलभ्यतेमुखाभ्यन्तरेतन्निगिरन्नेवशुचिर्भवति । मनुः । स्पृशंतिबिंदवः पादौयआचामयतः परान् ॥ भूमिगैस्ते
समाज्ञेयानतैरप्रयतोभवेत् ॥ यमः । प्रयांत्याचमतोयास्तुशरीरेविप्रुषोनृणाम् ॥ उच्छिष्टदोषोनास्त्यत्रभूमितुल्यास्तुताः स्मृताः ॥
मनुः । नोच्छिष्टंकुर्वतेमुख्याविप्रुषोंगंनयंतियाः ॥ मुख्यामुखभवाविप्रुषोंगंनयन्तियातिताउच्छिष्टंनकुर्वतइत्यर्थः । अंगगतासुच
द्विरोमक्लेदनकरणक्षमास्वाचमनं ॥ तथ पैठीनसिः । द्विरोमक्लेदनेष्वाचामेत् । अत्र्याङ्गिरसौ । मधुपर्कंतुसोमेच अप्सुप्राणाहुती
षुच । नोच्छिष्टस्तुभवेद्विप्रोयथात्रेर्वचनंतथा ॥ अप्सुअपोशाने । एवमेवकल्पतरुः । प्राणाहुतिषुपंचग्रास्यां । शातातपः । दंतल
ग्नफलेमूलेभक्ष्येस्नेहेतथैवच ॥ तांबूलेचेक्षुखण्डेचनोच्छिष्टोभवतिद्विजः ॥ फलेतिक्तकषायेजातीफलादौसमाचारादित्याहुः प्रामा
णिकाः । भक्ष्येकटुकषाये । मनुः । उच्छिष्टेनतुसंस्पृष्टोद्रव्यहस्तः कथंचन । अनिधायैवतद्द्रव्यमाचान्तः शुचितामियात् ॥
द्रव्यहस्तोदुग्धादिहस्तएवाचान्तः शुचितामाप्नुयादितिरत्नाकरः । द्रवमंत्रान्नपानव्यतिरिक्तमित्याचारादर्शः । बृहस्पतिः । प्रचरं

अन्नपानेषुयदोच्छिष्टमुपस्पृशेत् । भूमौनिधायतद्द्रव्यमाचम्यप्रचरेत्पुनः ॥ प्रचरन्परिवेषणंकुर्वाणः अन्नपानेषुलेपकादाप्वात
रत्नाकरः । भूमिनिहितस्यतुद्रव्यस्याभ्युक्षणं । तथा । अरण्येनुदकेरात्रौचौरव्याघ्राकुलेपथि । कृत्वामूत्रं पुरीषंचद्रव्यहस्तोनदुष्यति ॥
शौचंतुकुर्यात्प्रथमंपादौप्रक्षालयेत्ततः । उपस्पृश्यतदभ्युक्ष्यगृहीतंशुचितामियात् ॥ आपस्तम्बः । कृत्वामूत्रंपुरीषंचद्रव्यहस्तः
कथंचन । भूमावन्नंप्रतिष्ठाप्यकृत्वाशौचंयथाविधि ॥ तत्संयोगात्तुपक्वान्नमुपस्पृश्यततः शुचिः ॥ अथस्नानशुद्धिः । तत्रमनुः ।
दिवाकीर्तिमुदक्यांचसूतिकांपतितंतथा । शवंतत्स्पृष्टिनंचैवस्पृष्ट्वास्नानेनशुद्ध्यति ॥ आचम्यप्रयतोनित्यंजपेदशुचिदर्शने । सौरान्म
न्त्रान्यथोत्साहंपावमानीश्चशक्तितः ॥ नारंस्पृष्ट्वास्थिसस्नेहंस्नात्वाविप्रोविशुद्ध्यति । दिवाकीर्तिश्चांडालः उदक्यारजस्वलासूतिकाप्रसवे
स्यप्रान्तस्नानसमया । तत्स्पृष्टिनामिति । दिवाकीर्त्यादीनांसर्वेषांतच्छब्देनपरामर्शः । तेनचाण्डालादिस्पर्शो नचेत्यर्थः । एतच्चाकामकृतस्पर्श
विषयं । कामकृतेतुबृहस्पतिः । पतितंसूतिकामंत्यंशवंस्पृष्ट्वातुकामतः ॥ स्नात्वासचैलंहुत्वाग्निंघृतंप्राश्यविशुद्ध्यति ॥ सचैलमितियद्वस्त्रम
स्पृश्यस्पर्शकालेभवतितेनसहैवस्नातव्यमित्यर्थः । स्नानंचेदंजलाशयावगाहनासंभवेउष्णोदकेनापिकर्त्तव्यं । यदाहशंखः । नित्यंनैमित्ति
कंचैवक्रियांगंमलकर्षणम् । तीर्थाभावेपिकर्त्तव्यमुष्णोदकपरोदकैः ॥ अशुचिदर्शनेतुपावमानीः सौरान्मंत्रांश्चआचम्यप्रयतोजपेत् ॥ अ
शुचिश्चांडालादिरेवेतिरत्नाकरः । पावमान्य ऋग्विशेषाः । बहुत्वंचत्रित्वपर्यवसितं । अस्थिस्पर्शेचात्रस्नानमकामकृते । कामकृतेतुब्रह्मपुरा
णे । मानुषास्थितुसंस्पृश्यस्निग्धंनिःस्नेहमेववा । स्नायाद्वासंस्पृशेत्सूर्यंपश्येद्विष्णुमनुस्मरेत् ॥ निःस्नेहास्थिसंस्पर्शेअकामकृते
आचमनमात्रंविष्णुमतं । एतच्चसर्वंद्विजास्थिस्पर्शे । अन्यत्रतुकामकृते । वासिष्ठः । मानुषास्थिस्निग्धंस्पृष्ट्वात्रिरात्रमाशौचं । अस्निग्धेत्वहो

रात्रमिति । अत्रसर्वैकवाक्यतयायमर्थः । भक्ष्यपचनखास्थिस्पर्शेदोषाभावः । अभक्ष्यपचनखास्त्रद्वास्थिस्पर्शे आचमनं । सस्नेहब्राह्मणा
स्थिस्पर्शेऽकामकृतेस्नानम् । कामकृतेस्निग्धास्निग्धब्राह्मणास्थिस्पर्शेस्नानंगोस्पर्शनंसूर्यदर्शनंविष्णुस्मरणं । निःस्नेहब्राह्मणास्थिस्प
र्शेअकामकृतेआचमनमात्रम् । ब्राह्मणेतरमानुषसंबंधिस्निग्धास्थिस्पर्शेकामकृतेत्रिरात्रमाशौचम् । अस्निग्धब्राह्मणेतरास्थिस्पर्शेऽकाम
कृतेऽहोरात्रमाशौचम् । मनुः । वांतोविरिक्तःस्नात्वाचघृतप्राशनमाचरेत् । आचामेदेवभुक्त्वान्नंस्नानंमैथुनिनः स्मृतम् ॥ वान्तःकृतव
मनः विरिक्तःकृतविरेकःप्रकृताधिकविरेकवान् । एवंभूतवास्नात्वाघृतंप्राश्यविशुद्ध्यतीत्यर्थः । मिलितंचेतद्द्वयंनिमित्तम् मैथुनेदु
स्वप्नेवमनविरेकयोरितिविष्णुवचनादितिरत्नाकरः । आचामेदित्यादिअन्नंभुक्त्वावांतआचामेदेवनस्नायात् । तेनादिनांतरेवमनविरेकयोः
स्नाननिमित्तत्वमित्यर्थः । स्नानंमैथुनिनइत्यपिऋतुकालमैथुनविषयं । तथाचशातातपः । ऋतौतुगर्भशंकित्वात्स्नानंमैथुनिनःस्मृतम् । अनृ
तौतुसदाकार्य्यंशौचंमूत्रपुरीषवत् ॥ मूत्रपुरीषवदितिलेपालपत्वभूयस्त्वविषयतयाव्यवस्थितं । यमः । अजीर्णेभ्युदितेवांते श्मश्रुक
र्मणिमैथुने ॥ दुःस्वप्नेदुर्जनस्पर्शेस्नानमात्रंविधीयते । अजीर्णेभ्युदये सूर्योदयानन्तरंवांतेवांतसमुदितमेतन्निमित्तंतेनपर्युषितवांतेस्नानमि
त्यर्थः । श्मश्रुकर्मणिश्मश्रुक्षौरेमैथुनेऋतुकालएवस्नानं । तत्स्नानंप्रातःकालेकर्त्तव्यमितिवृद्धाइतिश्रीदत्तोपाध्यायाः । दुर्जनश्चांडा
लादिः देवलः । श्वपाकंपतितंव्यंगमुन्मत्तंशवहारकं । सूतिकांसूयिकांनारींरजसाचपरिप्लुतां ॥ श्वकुक्कुटवराहांश्चग्राम्यान्संस्पृश्यमानवः ।
सचेलंसशिराःस्नात्वातदानीमेवशुद्ध्यति ॥ अशुद्धान्स्वयमप्येतान् शुद्धश्चयदिसंस्पृशेत् । विशुद्ध्यत्युपवासेनतथाकृच्छ्रेणवापुनः ॥
सूयिका प्रसवकारयित्री । कृच्छ्रेणवापुनरितिवारंवारंकामकृतस्पर्शविषयं । तथाचस्पृश्याशुचिस्पृष्टंतृतीयंवापिमानवः । हस्तौपादौ

ततोयेनप्रक्षाल्यान्न्यसशुद्ध्यति । अत्रचाण्डालादिस्पृष्टस्पर्शेअज्ञानकृतेहस्तपादादिप्रक्षालनमाचमनंचज्ञेयम् । कामकृतेचां
डालादिस्पृष्टस्पर्शेस्नानमनुक्तं । तथा । मानुषास्थिवसाविष्ठामार्त्तवंमूत्ररेतसी । मज्जानंशोणितंवापिपरस्ययदिसंस्पृशेत् ॥ स्ना
त्वापामृज्यंलेपादीनाचम्यसशुचिर्भवेत् । तान्येवस्नानीसंस्पृश्यपूतःस्यात्परिमार्जनात् । लेपादीनपमृज्यस्नात्वाचेतिक्रमः । अत्रव
सादीनामपिमानुषसंबन्धिनामेवोपादानंसान्निहितत्वात् । वसादिस्पर्शेश्चात्रनाभेरुपरिस्नानहेतुः । ऊर्ध्वंनाभेःकरोमुक्त्वायदंगमुप
हन्यते ॥ तत्रस्नानमधस्तात्तुक्षालनेनैवशुद्ध्यति ॥ इत्यंगिरोवचनात् । अधःस्पर्शेतुक्षालनं आचमनमुभयत्र । बौधायनः ॥
चाण्डालेनसहाध्वगमनेसचैलस्नानम् । इदंचकामकृतविषयं । चांडालस्यमुख्यतयातत्सहगमनविषयमित्यर्थइतिरत्नाकरः । पराशरः ।
चैत्यवृक्षश्चितिर्यूपश्चांडालःसोमविक्रयी ।. एतांस्तुब्राह्मणःस्पृष्ट्वासचैलोजलमाविशेत् ॥ बौधायनः । शुनोपहतःसचैलोजलमव
गाहेत । प्रक्षाल्यचतंदेशमग्निनासंस्पृश्यपुनः प्रक्षाल्यपादौचाचम्यप्रयतोभवति । शुनोपहतःशुनास्पृष्टः । अत्रनाभेरूर्ध्वस्प
र्शेस्नानंनाभेरधःस्पर्शेप्रक्षाल्याचमनंचेतिव्यवस्थितोविकल्पइतिरत्नाकरः । हारीतः । श्वपचमुष्टिकप्रेतहारकशवादिसंस्पृश्यदेवीरापइत्यं
ताभिरंतर्जलेस्नातःपूतोभवति ॥ श्वपचःश्वखादकःटांकइतिप्रसिद्धः । मुष्टिकःशबरइतिरत्नाकरः । देवीरापइत्येता देवीरापोअपान्नपादि
त्याद्यास्तिस्रऋचः अयंचप्रयोगोवारंवारस्पर्शे अन्यथास्नानमात्रं । तथा । अजीर्णवांतश्मश्रुकर्माऽयोनिपशुदिवामैथुनगमनेच अयोनि
योनिव्यतिरिक्तमंगंपशुर्गवादिःदिवादिनंएतेषुमैथुनगमनेअजीर्णवांतश्मश्रुकर्मणोश्चस्नानमित्यर्थः । पराशरः । श्वकाकैरवलीढस्यनखै
र्विदलितस्यच । अद्भिःप्रक्षालनंशौचमग्निनाचोपचूलनं ॥ अवलीढस्याजिह्वयास्पृष्टस्य । उपचूलनंशिरोभिन्नांगेवह्निज्वालयास्पर्शो

नम् ॥ च्यवनः । श्वानश्वपाकप्रेतधूमदेवद्रव्योपजीविनं । ग्रामयाजकयूपचितिचितिकाष्ठमद्यमद्यभाण्डसस्नेहमानुषास्थिशवस्पृष्टं
रजस्वलांमहापातकिनंशवंस्पृष्ट्वा सचेलमंभोवगाह्यउत्तीर्याग्निमुपस्पृशेत् । गायत्र्यष्टशतंजपेत । घृतंप्राश्यपुनःस्नात्वात्रिराचामेत् ।
अत्राग्निस्पर्शादिकामकृतेवारंवारस्पर्शे । अन्यथास्नानमात्रम् । आपस्तम्बः । एकशाखांसमारूढश्चंडालादिर्यदाभवेत् । अनश्नन्ब्रा
ह्मणस्तत्रस्नानेनशुचितामियात् ॥ कालिकापुराणे । स्पृष्ट्वारुद्रस्यनिर्माल्यंसवासाआप्लुतःशुचिः ॥ निर्माल्यमत्रापनीतमेवेत्याचा
रादर्शः । व्यासः । भासवानरमार्जारखरोष्ट्राणांशुनांतथा ॥ शूकराणाममेध्यंचस्पृष्ट्वास्नायात्सचेलकं ॥ भासोगोष्ठकुक्कुटइतिप्रसिद्धः ।
गृध्रोवा । अत्रोर्ध्वांगस्पर्शेस्नानं ॥ नाभेरधोंगस्पर्शेमृत्तोयाभ्यांप्रक्षालनमाचमनंचवाक्यांतरैकवाक्यतया । याज्ञवल्क्यः । चाण्डालपुल्क
सम्लेच्छभिल्लपारसिकादिकान् । महापातकिनश्चैवस्पृष्ट्वा स्नायात्सचेलकम् ॥ पुल्कसश्चांडालजातिभेदः म्लेच्छाः प्रसिद्धाः भिल्ला
स्तद्भेदाःपारसिकायवनाःआदिपदेनतज्जातिभेदाविज्ञेयाः । मार्कण्डेयपुराणे अभोज्यसूतिकाषंढमार्जाराखुश्वकुक्कुटान् ॥ पतितापविद्धचांडालमृतहारांश्चधर्मवित् ॥ संस्पृश्यशुद्ध्यतिस्नानात् उदक्याग्रामशूकरौ ॥ अत्रमार्जारस्पर्शेयदुपस्नानंतद्यदिमार्जारः
पुरुषेणस्पृश्यतेतदाज्ञेयं यदिमार्जारएवपुरुषंस्पृशति भाण्डादिवातदापुरुषादेरशौचाभावः । तद्विषयमेव मार्जारश्चसदाशुचिरिति
विष्णुवचनमितिव्यवस्थेत्याचारादर्शः ॥ पैठीनसिः । अनुदकमूत्रपुरीषकरणे सचेलस्नानंउदकव्यतिरेकेणमूत्रपुरीषोत्सर्गा
नंतरंशौचविलंबेशौचंकृत्वास्नानमित्यर्थः । ब्रह्मपुराणे उच्छिष्टेनाथविप्रेणविप्रःस्पृष्टस्तुतादृशः । उभौस्नानंप्रकुरुतः सद्य
एवविशुद्ध्यतः । लघुहारीतः । श्वविष्ठांकाकविष्ठांवाकंकगृध्रनरस्यच । अधोच्छिष्टंचसंस्पृश्यसचेलोजलमाविशेत् । ऊर्ध्वं

च्छिष्टस्तु संस्पृष्टः प्रायश्चित्तं समाचरेत् ॥ उपोष्य रजनीमेकां पंचगव्येन शुद्ध्यति ॥ अधोच्छिष्टो मूत्राद्युत्सर्गेणाशुद्धः । ऊर्ध्वोच्छिष्टो भोजनोच्छिष्टः । जलमाविशेत् सचैलं स्नायादित्यर्थः । सर्वत्र चात्र प्रकरणे जलमाविशेदित्यादिवाक्यानि वरुणस्नानोपलक्षकानीत्याचारादर्शः । शंखः । रथ्याकर्दमतोयेन ष्ठीवनाद्येन वा पुनः ॥ नाभेरूर्ध्वं नरः स्पृष्टः सद्यः स्नानेन शुद्ध्यति ॥ अत्र च प्रकरणे एषु नैमित्तिकस्नानेषु मंत्रतर्पणे नस्तः । तथा चापस्तंबः । अस्पृश्यास्पर्शने वान्ते अश्रुपाते क्षुरे भगे ॥ स्नानं नैमित्तिकं प्रोक्तं दैवपैत्रविवर्जितं ॥ जलाशय मज्जनासंभवे उष्णोदकेनाप्येतत्स्नानं कर्त्तव्यं । तथा च शंखः । नित्यं नैमित्तिकं चैव क्रियांगं मलकर्षणं । तीर्थाभावेपि कर्त्तव्यमुष्णोदकपरोदकैः ॥ क्रियांगं देवपूजादिक्रियांगं मलकर्षणाभ्यङ्गपूर्वकं । यदातुरोगादिवशादुष्णोदकस्नानेशक्तिरपि न भवति तदा शुद्धिप्रकारमाह । यमः । आतुरस्नानसंप्राप्तौ दशकृत्वस्त्वनातुरः ॥ स्नात्वा स्पृशेत क्षिप्रं ततः शुद्ध्येत्स आतुरः ॥ इति स्नानशुद्धिप्रकरणम् ॥

अथ तैजसादिद्रव्यशुद्धिः । ब्राह्मपुराणे । सुवर्णरौप्यशंखाश्मशुक्तिरत्नमयानि च ॥ कांस्यायस्ताम्ररैत्यानि त्रपुसीसमयानि च ॥ निर्लेपानि च शुध्यंति केवलेनोदकेन च ॥ शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ॥ सूतिकाशवविण्मूत्ररजस्वलाहतानि च ॥ प्रक्षेप्तव्यान्यग्नौ यावत्सहेदपि ॥ रत्नमयानि स्फटिकादिघटितानि रैत्यानि पित्तलघटितानि त्रपुमयं रंगघटितम् । शूद्रोच्छिष्टानि शूद्रोच्छिष्टस्पृष्टानीत्ययमर्थो ज्ञेयः शूद्रेण भुक्ते भाजने अग्रे शंखवाक्येन शुद्धिरभिधास्यते । सूतिकारजस्वलोपहतत्वं भाजनस्य भोजनद्वारेवेतत् शंखवाक्ये स्फुटीकरिष्यते । प्रक्षेप्तव्यानीति प्रक्षालनानन्तरं यद्भाजनं यावत्समयपर्यन्तम् अग्निं सहेत तावत् अग्नौ संयोजयेत् । मनुः । ताम्रायः कांस्यरैत्यानां त्रपुणः सीसकस्य च ॥ शौचं यथार्हं कर्त्तव्यं क्षाराम्लोदकवारिभिः ॥ यथार्हं मलापकर्षणसामर्थ्यानुसारे

णक्षारो भस्म अम्लोदकं जंबीरादिरसः योग्यतानुसारादम्लोदकं ताम्रेण संबध्यते । इतरेषु क्षारोदकं जलेन तूभयत्र समुच्चयः । शंखः । अम्लोदकेन ताम्रस्य सीसस्य त्रपुणस्तथा ॥ क्षारेण शुद्धिः कांस्यस्य लोहस्य च विनिर्दिशेत् ॥ एतदापि स्नेहादिलेपयुक्त विषयं । पैठीनसिः । त्रपुसीसकानां गोमयतुषैः । तथा उच्छिष्टस्नेहसंस्पर्शे क्षारोदकाभ्यामब्जस्य च अब्जस्य शंखशुक्त्यादेः । बोधायनः । तैजसानान्तु पात्राणामुच्छिष्टोपहतानां त्रिः सप्तकृत्वः परिमार्जनं । परिमार्जनेद्रव्याणि मृद्गोमयभस्मानि । मूत्रपुरीषलोहितरेतःप्रभृत्युपहतानां पुनःकरणं गोमूत्रे वा सप्तरात्रं परिस्थापनं महानद्यां वा । एवमश्ममयानां च । अलाबुबिल्ववैदलानां गोवालैः परिमार्जनं लवणकुशस्थूणानां गोमयोदकेन प्रक्षालनं त्रिः सप्तकृत्वः परिमार्जनमेकविंशतिवारानित्यर्थः । वैदलानां वेणुदलादिनिर्मितानामित्यर्थः । शातातपः । गवाघ्रातेषु कांस्येषु शूद्रोच्छिष्टेषु वा पुनः । दशभिर्भस्मभिः शुद्धिः श्वकाकोपहतेषु च ॥ अंगिराः । गंडूषं पादशौचं च यः कुर्यात्कांस्यभाजने । भूमौ निक्षिप्य षण्मासान्पुनराकरमाविशेत् ॥ यइत्यार्षत्वात् विभक्तिव्यत्ययेन सप्तम्यर्थे प्रथमा । आकरमाविशेत् अग्नौ दहेत् । शंखः । सूतिकोच्छिष्टभांडस्य सुरामद्यहतस्य च । त्रिःसप्तमार्जनैः शुद्धिर्न तु कांस्यस्य भाजने ॥ भांडस्य भाजनस्य सौवर्णादेः । सुरा गौडी पैष्टी माध्वी त्रिधा । तद्व्यतिरिक्तं पनसादिसंभवं मद्यम् । ताभ्यां चोपहतस्य त्रिः सप्तमार्जनैरेकविंशतिमार्जनैः शुद्धिः । कांस्यस्य तु नेयं शुद्धिः । किं तु सकृदुपहते अग्नौ प्रतापनम् । एभिरसकृदुपघाते पुनर्घटनेन शुद्धिः । शंखः । ब्रह्मक्षत्रविशां चैव सकृत्संमार्जनाच्छुचिः । चतुर्थेन तु यद्भुक्तं चतुर्भिरथ मार्जितं ॥ अग्नौ निक्षिप्य गृह्णीयाद्धस्तौ प्रक्षाल्य यत्नतः ॥ गोशृंगेण तु संस्पृष्टं तत्पात्रं शुचितामियात् । ब्रह्मक्षत्रविशां यस्मिन्भाजने भोजनं कृतं ॥ तत्तं सकृन्मार्जनाच्छुचीत्यर्थः । चतुर्थेन शूद्रेण तु ब्राह्मणादीनां यद्भुक्तं तच्चतुर्वारमार्जनादिभिः शुद्ध्यतीत्यर्थः ॥

तदियंसर्वैकवाक्यतयातैजसद्रव्यशुद्धौव्यवस्था । सुवर्णरूप्यशंखाश्मशुक्तिरक्तकांस्यपित्तललोहरंगसीसकमयानिभाजनानिकेवले नजलेनशुद्ध्यंति । उच्छिष्टादिलेपयुक्तानिक्षारोदकाम्लोदकाभ्यांयथायोग्यंशुद्ध्यंति । शूद्रोच्छिष्टेनाचिरकालोपघातेवारत्रयंक्षारोदकक्षालनानंतरंवह्नौयावत्सहनंक्षेपाच्छुद्ध्यंति । एकवारंश्वकाकशूद्रोच्छिष्टदूषितानिगवाघ्रातानिचकांस्यानिदशवारंक्षारोदकमार्जनाच्छुद्ध्यंति । अनेकवारंश्वकाकशूद्रोच्छिष्टदूषितानिएकविंशतिवारक्षारोदकमार्जनाच्छुद्ध्यंति । त्रैवर्णिकस्ययस्मिन्भाजनेशूद्रोभुंक्तेतच्चतुर्भिःक्षारैर्मार्जनानंतरमग्नौप्रक्षिप्तंप्रक्षालितहस्ताभ्यांगृहीतंशुद्ध्यति । सूतिकोच्छिष्टंमद्यसुराभिःसकृदुपहतंकांस्यभाजनमग्नौप्रतापनाच्छुद्ध्यति । असकृदुपहतंपुनर्घटनेनशुद्ध्यति । गंडूषपादशौचेयस्मिन्कांस्यभाजनेतत्षण्मासनिखननानंतरंवह्नौप्रतापनाच्छुद्ध्यति । मूत्रपुरीषरेतःप्रभृतिभिः शारीरैर्मलैरल्पकालमुपहतानितैजसपात्राणिसप्तरात्रंगोमूत्रमहानद्यांवास्थापनात् शुद्ध्यंति । अनेकवारमूत्राद्युपहतानिशवसूतिकारजस्वलोपहतानिचवारत्रयंक्षारोदकप्रक्षालनानंतरंयावत्सहनमग्नौप्रतापनात्शुद्ध्यंति । चिरकालंव्याप्यवारंवारंमूत्रादिभिरुपहतानिपुनर्घटनेनशुद्ध्यन्ति । देवलः । लोहानांदहनाच्छुद्धिर्भस्मनागोमयेनवा । दहनात्खननाद्वापिशैलानामंभसापिवा ॥ काष्ठानांतक्षणाच्छुद्धिर्मृद्गोमयजलैरपि । मृण्मयानांतुपात्राणांदहनाच्छुद्धिरिष्यते ॥ अत्रदहनादित्यत्यंतोपघातविषयम् । अन्यथा भस्मनागोमयेनवा।शैलंशिलाभाजनंतत्रापि अत्यंतोपघातेदहनेनखननेनवाअन्यथा जलेनकाष्ठभाजनानामपिसलेपोपघातेतक्षणंदन्यत्रजलेनैवेतिव्यवस्था । मृण्मयानामत्यंतानुपहतानांपुनः पाकः । अत्यंतोपहतानांमृण्मयानांदारवाणांत्यागः । तथाचविष्णुः । दारवंमृण्मयंचजह्यात । तत्रात्यंतोपहतमिति पर्वप्रस्ततम । कश्यपः । सिकताभिर्दन्तशृंगशंखशुक्तीनांसिकता

भिर्जव्युक्तवालुकाभिः । अत्यंतोपघातविषयंचेदम् । अन्यथाकेवलजलेनशुद्धिः । शुद्धिरित्यनुवृत्तौ हारीतः । अद्भिःकांचनराजतानां
तद्गुणवर्णयोगात् स्नेहवैवर्ण्योपहतानामेवगोधूमकलायमाषगोमयचूर्णैर्मार्जनंगोरोचनादिभिः प्रक्षालनम् । अम्ललवणाभ्यांताम्राणां । भस्म
नाकांस्यानां । शाणवर्षणैःकार्ष्णायसानां । सिकतावघातकर्षणैःशैलानां । शैलावघर्षमार्जनैर्मणिमयानां । निर्लेपनैर्दारुमयानां । पुनःपाके
नमृण्मयानां । गोमूत्रगोमयाबिल्वैर्वेणुदलानां । गोवालरज्ज्वासोदकपानैर्दलपात्राणां मार्जनंकमंडलूनां यतिपात्राणांच । क्षारोदकाभ्यां
कार्पासशणमयानां । पुत्रजीवारिष्टकैः क्षौमदुकूलानां । पुत्रजीवोदश्विद्भिश्चीराणां । श्रीफलश्वेतसर्षपैः कौशेयानाम् । उदश्विद्भल्ली
कमुद्गसर्षपैः ऊर्णानां । स्नेहसक्तुकुल्माषोद्वर्तनैर्गुरूणां । अयमर्थः । तद्गुणवर्णयोगात् । तद्गुणोयोवर्णः तेनयोगः । अनुपकृतत्वंतत्रकां
चनादीनामद्भिः केवलाभिः शुद्धिः सुव्यक्तमन्यत् पुत्रजीवः पितरजात्रिआ अरिष्टः आरिडइतिप्रसिद्धः । उदश्वित् तक्रं । कुल्मा
षःज्योडाइतिप्रसिद्धइतिरत्नाकरः । अत्रचपुत्रजीवादिमिश्चूर्णैतैः शोधनंयोग्यत्वात् । क्षौमादयः पट्टवस्त्रभेदाः । गुरूणामितिऊर्णा
मयानामेवमहतांकेवलानामित्यर्थः । एषाचशुद्धिरेषांवस्त्राणांमलवत्त्वेसति अन्यथाकेवलजलेनशुद्धिः । तथाचदेवलः । तांतवम
लिनंपूर्वमद्भिः क्षारैश्चशोधयेत् । अंशुभिः शोधयित्वावापुनर्वासः समाहरेत् ॥ ऊर्णापट्टांशुकक्षौमदुकूलाविकचर्मणाम् । अल्पाशौ
चेभवेच्छुद्धिः शोषणप्रोक्षणादिभिः ॥ तान्येवामेध्यलिप्तानिनिर्ज्याद्गौरसुसर्षपैः । धान्यकल्कैःपर्णकल्कैरसैश्चफलवल्कलैः ॥
तूलिकामुपधानानिपुष्परक्तांबराणिच । शोधयित्वातपेत्किंचित्करैरुन्मार्जयेन्मुहुः । पश्चात्तुवारिणाप्रोक्ष्यशुचीत्येवमुदाहरेत् ।
तान्यप्यतिमलिष्ठानियथावत्परिशोधयेत् ॥ शातातपः ॥ कुसुंभकुंकुमारक्तास्तथालाक्षारसेनच । प्रक्षालनेनशुद्ध्यंतिचांडालस्य

शनेतथा ॥ आंगिराः ॥ शौचंसहस्रलोमाणांवाय्वग्न्यर्केन्दुरश्मिभिः । रेतःस्पृष्टंशवस्पृष्टमाविकंनैवदुष्यति । शयनासनानिधानानिरो
मवद्धानियानिच ॥ वस्त्राण्येतानिसर्वाणिसंहतानिप्रचक्षते । सहस्ररोमां णामितिऊर्णादिरोमनिर्मितानामित्यर्थः । रोमवद्धानिकंवलादी
निसंहतानिशयनादीनिचतानिचवाय्वादिभिः शुद्ध्यन्तीत्यर्थः । उशनाः । कौशेयानांगौरसर्षपकल्केनमृद्भिश्चान्येषां । ब्रह्मपुराणे ।
प्रत्यहंक्षालयेद्वस्त्रंदैवेपित्र्येचकर्मणि । सर्वंविण्मूत्रशुक्रैस्तुदूषितश्चमृदम्बुभिः ॥ मृदम्बुभिः शुद्ध्यतीतिशेषः । विष्णुः । अत्यंतोपहतस्य
यत्प्रक्षालितंसत्रविरज्यतेतच्छिन्द्यात् । बृहस्पतिः । वस्त्रवैदलचर्मादेः शुद्धिःप्रक्षालनंस्मृतम् । अतिदुष्टस्यतन्मात्रंत्यजेच्छित्वा
तुशोधयेत् । यमः । कृष्णाजिनानांबालैश्च बाल्कनांमृद्भिरंभसा । गोमूत्रेणास्थिदन्तानांक्षौमाणांगौरसर्षपैः ॥ बालानांचाम
राणामित्यर्थः । शंखः । सिद्धार्थकानांकल्केनदन्तशृंगमयस्यच । गोवालैःफलपात्राणामस्थ्नांस्याच्छृंगवत्तथा ॥ फलपात्रा
णांनालिकेरादिप्रभवाणाम् । अस्थ्नांशंखादीनांतेषांचेयंशुद्धिरल्पोपघातेऽत्यन्तोपघातेऽवलेखनंवायुपुराणोक्तं । तथा । निर्या
सानांगुडानांचलवणानांतथैवच । कुसुंभकुसुमानांचऊर्णाकार्पासयोस्तथा ॥ प्रोक्षणात्कथिताशुद्धिरित्याहभगवान्यमः ॥
मनुः । मार्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि । चमसानांग्रहाणांचशुद्धिःप्रक्षालनेनच ॥ चरूणांस्रुक्स्रुवाणांचशुद्धिरु
ष्णेनवारिणा । स्फ्यशूर्पशकटानांचमुसलोलूखलस्यच ॥ अद्भिस्तुप्रोक्षणंशौचंबहूनांधान्यवाससां ॥ प्रक्षालनेनत्वल्पा
नामद्भिःशौचंविधीयते ॥ चैलवच्चर्मणांशुद्धिर्वैदलानान्तथैवच । शाकमूलफलानांचधान्यवच्छुद्धिरिष्यते । प्रोक्षणात्तृणकाष्ठानां
पलालंचविशुद्ध्यति । मार्जनोपांजनैर्वेश्मपुनःपाकेनमृण्मयम् ॥ उपांजनंवायुपुराणे । मणिवज्रप्रवालानांमुक्ताशंखोपलस्य

च । सिद्धार्थकानांकल्केन तिलकल्केनवापुनः । सिद्धार्थकाः सर्षपाः ॥ बोधायनः । आसनंशयनंयानंनावः पंथास्तृणानिच । मरुतार्केण शुद्ध्यंतिपक्केष्टकचितानिच ॥ आसनंशयनंवस्त्रं नायापत्यंकमण्डलुः । शुचीन्यात्मनएतानि परेषामशुचीनिच ॥ हारीतः । पय सादांतानांक्रीतानांमवहननोत्पवनैः व्रीहियवगोधूमानां घर्षणदलनपेषणैः शमीधान्यानां कंडनविमृशनप्रक्षालनैः फलीकृतानांघर्षणप्रक्षा लनपर्यग्निकरणैः शाकमूलफलानांभूस्थग्रहणेप्रक्षालनैरिक्षुकाण्डानां शमीधान्यवत् यज्ञहविषां श्रपणमेवस्नेहानांपुनः पाकः कृतलवणा नां पुल्कसादिभिः स्पृष्टानांभूस्थानांतृणकाष्ठानामादित्यदर्शनाच्छौचम् । दांतानांदंतनिर्मितानांक्रयोपात्तानांव्रीहियवादीनांशमीधा न्यानांमुद्गादीनांशिंबीप्रभवानांफलीकृतानांतण्डुलानाम् अवहननंकंडनम् उत्पवनंप्रस्फोटनं शूर्पेणनिस्तुषीकरणंपर्यग्निकरणंतदुपरिअग्नि भ्रामणमित्यर्थः । शुद्धिरित्यनुवृत्तौ । विष्णुः । गुडादीनामिक्षुविकाराणांप्रसूतानांवाय्वग्निदानेनसर्वलवणानांच तथाद्रव्यवत्कृतशौ चानांदेवतार्चानांभूयः प्रतिष्ठापनेन असिद्धान्नस्ययावन्मात्रमुपहतंतावन्मात्रंपरित्यज्यशेषस्यकंडनक्षालनेकुर्यात् । देवतार्चादेवप्र तिमातस्याअस्पृश्यादिस्पृष्टायाः कृतप्रकृतिद्रव्यस्यताम्रादेः यथोक्तंशौचंकृत्वापुनः प्रतिष्ठापनेनशुद्धिः पूजार्हत्वमित्यर्थः । अतिम लिनानुवृत्तौ देवलः । सर्वद्रव्याणांपक्वानांलवणस्यगुडस्यच ॥ नान्यच्छौचंपरित्यागादशुद्धानामितिस्थितिः ॥ तोयाभावेपरस्पर्शेभूमि संवेशनेपिच ॥ कुंडिकायाःपरित्यागो दहनंचापदिस्मृतं ॥ कुंडिका कमंडलुस्तस्याश्चतोयहीनायाअशुचिस्पृष्टायाअशुद्धभूमिधृतायाश्चप रित्यागः कुंडिकांतरालाभेदग्ध्वाग्राह्या । तथा । द्रव्याणामवशिष्टानांतोयाग्निभ्यांविशोधनं । शोधनार्थंतुसर्वेषामुभयंब्राह्मणेः स्मृतं ॥ श्वपाकोयत्स्पृशेद्द्रव्यंमृण्मयंद्रव्यमेववा ॥ पक्वंवाभोज्यकल्पंवातत्सर्वंपरिवर्जयेत् । भोज्यकल्पमर्द्धपकम् ॥ उच्छिष्टाशुचि

भिः स्पृष्टमद्भिश्शोध्यतेंभसा । द्रवंवापिप्रभूतंवशोधयेत्प्रोक्षणादिभिः । उच्छिष्टाशुचिभिःउच्छिष्टत्वेनाद्याचिभिः । वृद्धशातातपः ।
तापनंघृततैलानांप्लावनंगोरसस्यच । तन्मात्रमुद्धृतंशुद्धयेत्काठिनंतुपयोदधि ॥ अविलीनंतथासर्पिर्विलीनंश्रपणेनतु । बौधायनः ।
बहूनांकुसुंभकार्पासगुडलवणानांसर्पिषांकाठिनीभूतानांश्वचांडालादिस्पर्शेप्रोक्षणेनैवशुद्धिः । ब्रह्मपुराणे । द्रवद्रव्याणिभूरीणिपरि
शुध्यन्तिचांभसा । सस्यानिव्रीहयश्चैवशाकमूलफलानिच ॥ त्यक्त्वातुदूषितंभागंप्लाव्यान्यजलेनतु ॥ विष्णुः । प्रोक्षणेनचपुस्त
कं । मनुः । यावन्नापैत्यमेध्याक्ताद्गन्धोलेपश्चतत्कृतः । तावन्मृद्वारिचादेयंसर्वासुद्रव्यशुद्धिषु ॥ वृद्धशातातपः । अशुचिसंस्पृशेद्वस्तुएक
एवसदुष्यति । तंस्पृष्ट्वान्यानदुष्येत्तुसर्वद्रव्येष्वयंविधिः ॥ संहतानांतुपात्राणांयदेकमुपहन्यते । तस्यतच्छोधनंप्रोक्तंनतुतत्स्पृष्टि
नामपि । अत्राशुचिस्पृष्टस्यस्पर्शेयदशौचंनिषिद्धंनचांडालादिस्पृष्टदर्शनादन्यत्र । तेषांतुस्पृष्टस्पर्शेयथायथमाचमनस्नानादिकमुक्तमे
व । अथात्यंतोपहतशुद्धिः । तत्रविष्णुः । शारीरैर्मलैःसुराभिर्मद्यैर्वायदुपहतम् अत्यंतोपहतंसर्वलोहभांडमग्नौप्रतप्तंशुद्धयेत् ।
मणिमयमश्ममयमब्जमयंचसप्तरात्रमहीनिखननेन दंतशृंगास्थिमयंच तक्षणेन दारवं मृण्मयंचजह्यात् । अत्यंतोपहतस्यवस्त्रस्ययत्
प्रक्षालितंसत्नविरज्येतताच्छिन्द्यात् । लोहभाण्डंसुवर्णाद्यष्टधातुमयभाजनमितिरत्नाकरः । सुरा गौडीपैष्टीमाध्वीत्रिविधा तदितरत्सुरामद्यं
शारीराणिमलानिद्वादशविधानि वसादीनि । बौधायनः । अतैजसानामत्यंतोपहतानांचत्यागः । एषचत्यागोविष्णूक्तमणिमयादिभाज
नवर्जम् । शंखः । मद्यैर्मूत्रपुरीषैश्चश्लेष्मपूयाऽश्रुशोणितैः । संस्पृष्टंनैवशुद्धयेत पुनः पाकेनमृण्मयम् । एतैरेवतथास्पृष्टंताम्रसौ
वर्णराजतम् । शुद्धयत्यावर्तितंपश्चादन्यथाकेवलांभसा ॥ अत्रचतैजसेव्यवस्थाप्रथममेवदर्शितासाद्रव्यशुद्धिप्रकरणे । देवलः ।

॥२१॥

दूषितंवर्जितंदुष्टंकश्मलंचेतिलिंगिनाम् ॥ चतुर्विधममेध्यंचसर्वंव्याख्यास्यतेपुनः । लिङ्गिनामाश्रमिणामित्यर्थः । शुच्य
प्यशुचिसंस्पृष्टंद्रव्यंदूषितमुच्यते । अभक्ष्यभोज्यपेयानिवर्जितानीहचक्षते ॥ त्यक्तः पतितचाण्डालोग्रामकुक्कुटशूकरौ ।
श्वाचनित्यंविवर्ज्याःस्युःषडेतेधर्मतःसमाः ।. सव्रणःसूतकीसूतीमत्तोन्मत्तरजस्वलाः ॥ मृतबंधुरशुद्धश्चवर्ज्यान्यष्टौस्वका
लतः ॥ सूतीप्रसूतिका । अशुद्धःपुरीषादिना । स्वेदाश्रुबिंदवःफेनोनिरस्तनखलोमच । आर्द्रचर्मासृगप्येतद्दुष्टमाहुर्मनीषिणः ॥ मानुषा
स्थिशवंविष्ठारेतोमूत्रार्त्तवानिच ॥ कुणपंपूयमित्येतत्कश्मलंसमुदाहृतम् । दूषितेप्रोक्षणेनापिशुद्धिःसूक्ताविधानतः ॥ दुष्टेमार्जन
संस्कारैःकश्मलैःसर्वथाभवेत् ॥ दुष्टेश्चसम्बन्धेकश्मलैश्चसंबंधेद्रव्यमार्जनसंस्कारैः शुद्धिरित्यर्थः । संस्कारास्तुतत्रतत्रोक्ताः ॥ इतिते
जसादिद्रव्यशुद्धिः ॥ अथपक्वान्नशुद्धिः । ब्रह्मपुराणे ॥ पक्वमन्नंगवाघ्रातंमक्षिकाकेशदूषितम् । छागघ्रातंतुतत्कृत्वाकृत्वारत्नांबुभिः सह ॥
गवाघ्रातादिकमन्नंछागघ्रातंकृत्वारत्नांबुभिःसहसहितंकृत्वाशुद्ध्यतीत्यर्थः । भुंजतश्चापियच्चान्नंमाक्षिकाकेशदूषितं । . रजःपिपीलिकाजुष्टं
गवास्पृष्टमवक्षुतैः ॥ तदन्नंतुविहायैवशेषंक्षारांबुभिःशुचि ॥ यमः । मक्षिकाकेशमन्नेषुपतितंयदिदृश्यते । मूषकस्यपुरीषंवाक्षुतं यच्चावधू
नितम् ॥ भस्मनास्पृश्यचाश्नीयादभ्युक्ष्यसलिलेनच । क्षुतंयस्योपरिछिक्काकृता । अवधूनितंमुखश्वासोपहतम् । भस्मना
वेतिवाशब्दःसमुच्चये वाक्यांतरैक्यात् । तेनभस्मजलाभ्यांस्पृष्टंशुद्ध्यतीत्यर्थः । तथा । अवक्षुतंकेशपतंगकीटैरुदक्यया वापतितैश्च
दृष्टम् ॥ अज्ञातभस्मांबुहिरण्यतोयैःसंस्पृष्टमन्नंमनुराहभोज्यं ॥ अवक्षुतंयस्योपरिछिक्काकृता उदक्ययारजस्वलया अज्ञातभस्मेति
शुद्धस्थानभस्मोपलक्षणार्थं । तथा । मक्षिकादंशमशकापूर्णाःसूक्ष्माःपिपीलिकाः । आमिषामेध्यसेवीचनैतेकीटाविपत्तये ॥ आमि

पामेध्यसेवीसप्टिवमासोद्भवश्कीटः एतेकोटीविपत्तयअन्नदोषायनभवंतीत्यर्थः । शुद्धिस्तुभस्मादिनैवेतिभावः । शातातपः । केशकीटपन्ना
घ्रातंवायसोपहतंचयत् । स्त्रीवाभिस्पृष्टंपतितैःसूतिकोदक्यनास्तिकैः ॥ दृष्टंवास्याद्यदन्नंतुतस्यानिष्कृतिरुच्यते ॥ अभ्युक्ष्याकिंचिदुद्धृ
त्यभुंजीताप्यविशंकितः । भस्मनाचापिसंस्पृश्यसंस्पृशेदुदकेनवा । सुवर्णरजताभ्यांवाभोज्यंघ्रातमजेनवा । तथा । श्वशूकरखरोष्ट्र
श्वपदृष्टंउच्छिष्टंतुजंतुभिः ॥ अग्रंविहायतत्पश्चात्संस्पृष्टंव्यमथाग्निना । छागघ्राततंततः शुद्धं स्याद्धेमजलसंयुतम् । तथा । घृतंतुपायसंक्षीरंतथै
वेक्षुरसोद्भवं । शूद्रभांडगतंतक्रंतथामधुनदुष्यति ॥ पायसंपयोविकारोदध्यादीनिरत्नाकरः । कल्पतरुप्रभृतयोप्येवम् । एवंच । कटुपक्वं
स्नेहपक्वंपायसंदधिसक्तवः । एतान्यशूद्रान्नभुजो भोज्यानिमनुरब्रवीत् ॥ कटुपक्वानितैलेनपायसंदधिसक्तवः ॥ द्विजैरेतानि भोज्यानि
शूद्रगेहकृतान्यपीति ॥ हारीतकूर्मपुराणयोरपिवाक्ययोः पायसपदंदधीतराद्यामिक्षादिपयोविकारपरं बौधायनः । त्वक्केशलोमनख
तुषपुरीषाणिदृष्ट्वातद्देशंपिंडानुद्धृत्यअद्भिरभ्युक्ष्यभस्मनावकीर्य पुनरपिप्रोक्ष्यवाचाप्रशस्तमुपभुंजीतासिद्धहविषांमहतां श्वचापसप्रभृत्युपह
तानांतद्देशंपिंडमुद्धृत्य पवमानः सुवर्चसइत्येतेनानुवाकेनाभ्युक्षणंमधूदकेपयोविकारे चपात्रात्पात्रांतरानयने एवंतैलसर्पिषीउच्छिष्टसं
बंधारब्धेतूदकेचोपधायोपयोजयेत् । उपधायपात्रांतरे निक्षिप्य । उशनाः । अजाघ्रातेनान्नाद्यानांस्नेहघृतलवणमधुगुडानांपुनः पाकेन ।
अन्नाद्यानामदनीयानामन्नानामित्यर्थः । वृद्धमनुः । देवद्रोण्यांविवाहेचयज्ञेषुप्रकृतेषुच । काकैःश्वभिश्चयत्स्पृष्टंतदन्नंनैवदुष्यति ।
तन्मात्रमन्नमुद्धृत्यशेषंसंस्कारमर्हति । घनानांप्रोक्षणाच्छुद्धिर्द्रवाणामाग्नितापनात् । संस्पर्शनाद्भवेच्छुद्धिरपामग्नेघृतस्यच ॥
आवेनप्रथमंसर्वअग्नित्वेनविनिर्दिशेत् । देवद्रोणीग्रहणमन्नबहुत्वप्रदर्शनार्थं । प्रकृतेषुउत्सवेष्वित्यर्थः । यमः । शुक्तानिहिद्धि

षोन्नानिनभुंजीतकदाचन । प्रक्षाळयित्वानिर्दोषाण्यापद्धर्मोयदाभवेत् । शुक्तानिपर्युषितत्वाद्यान्यम्लतांगतानि । तयेवाचारात्
यदातुआपद्धर्मोअन्यान्नासंभवस्तदातानिप्रक्षाल्यनिर्दोषाणिपक्वान्नानिभुंजीतेत्यध्याहारेणान्वयः । मसूरामाषसंयुक्तंतथापर्युषितंच
यत् । तत्तुप्रक्षालितंकृत्वाभुंजीताज्याभिघारितम् । मसूरोप्यत्राभक्ष्यएवसाहचर्यात् । माषोत्रराजमाषः । देवलः । भक्तधान्या
दिराशीनामेकदेशस्यदूषणे । तावन्मात्रंसमुद्धृत्यशेषंप्रोक्षणमर्हति । भक्तराशिर्द्रोणाधिकः । विष्णुः । द्रोणादभ्यधिकंसिद्धमन्नं
नैवचदुष्यति । तस्योपहतमपास्यगायत्र्यभिमंत्रितंसुवर्णाभः क्षिपेतबस्तस्यदर्शयेत । अग्नेश्वद्रोणः । षोडशप्रस्थाः ।
बस्तःछागः । बृहस्पतिः । तीर्थेविवाहेयात्रायांसंग्रामेदेशविप्लवे । नगरग्रामदाहेच स्पृष्टास्पृष्टिर्नदुष्यति ॥ आपद्य[illegible]चकष्टायां
रुग्भयेपीडनेसदा । मातापित्रोर्गुरोश्चैवनिर्देशेवर्त्तनात्तथा ॥ आममांसंघृतंक्षौद्रंस्नेहाश्चफलसंभवाः । म्लेच्छभांडगता [illegible]प्यानिष्क्रां
ताःशुचयःस्मृताः ॥ शातातपः । गोकुलेकंदुशालायांतैलयंत्रेक्षुयंत्रयोः । अमीमांस्यानिशौचानिस्त्रीषुबालातुरेषुच । अमीमां
स्यानिशौचाशौचंभाजीतितिनविचारणीयानीत्यर्थः । बालः पंचवर्षाभ्यंतरवयस्कः । अथभूमिशुद्धिः । तत्रदेवलः । पंचधावाचतुर्धा
वाभूरमेध्याविशुद्ध्यति । दुष्टाद्विधात्रिधावापिशोध्यतेमलिनैकधा ॥ दहनंखननंभूमेरुपलेपनवापनम् । पर्जन्यवर्षणंचेतिशौचंपं
चविधंस्मृतम् ॥ अस्यार्थः । भूमिस्तावत्त्रिधाअपवित्राभवति । अमेध्यादुष्टामलिनाचेति । तत्रामेध्यायादहनादिभिः पंचभिश्चतु
र्भिर्वाशुद्धिः । दुष्टायाः दहनादिभिस्त्रिभिः । खननलेपनाभ्यांद्वाभ्यांमलिनायाः । एकधाउपलेपनेनशुद्धिः । वापनंमृदंतरेण
पूरणम् । तासुअमेध्यामाह । प्रसूतेगर्भिणीयत्रम्रियतेयत्रमानुषः ॥ चांडालैरुषितंयत्रयत्रविन्यस्यतेशवः । विण्मूत्रोपहतंयच्चकु

ष्पोयत्रदृश्यते । एवंकश्मलभूयिष्ठाभूरमेध्येतिलक्ष्यते ॥ दुष्टामाह ॥ कृमिकीटपदक्षेपैर्दूषितामेदिनीयादि । द्रप्सापकर्षणैःक्षितेर्वा
तैर्वादुष्टतांव्रजेत् ॥ द्रप्संघनीभूतंश्लेष्मादिमलम् । मलिनामाह ॥ नखदंततनूजत्वक्तुषपांसुरजोमलैः । भस्मपंकतृणैर्वापिप्रच्छन्नामलि
नाभवेत् । तनूजंलोम । अत्रचलेपघाताल्पत्वभूयस्त्वाभ्यां पंचधावाचतुर्धावाइत्यादिविकल्पोव्यवस्थितः । याज्ञवल्क्यः । भूशुद्धिर्मार्ज
नाद्दाहात्कालाद्गोक्रमणादपि । सेकादुल्लेखनाल्लेपाद्गृहंमार्जनलेपनात् ॥ अवकरनिरसनंमार्जनम् । कालोयावताकालेनापावित्र्यहेतुलो
पनयोर्भवतितावान्सेकोजलेनप्रक्षालनम् । उल्लेखनंतक्षणम् । गृहस्यपृथगुपादानंमार्जनलेपनयोः प्रातिदिनप्राप्त्यर्थम् । मनुः । संमार्जने
नांजनेनसेकेनोल्लेखनेनच । गवांचपरिवासेनभूमिःशुद्ध्यतिपंचभिः ॥ अंजनंगोमयोपलेपनम् । अत्रानिर्लेपसलेपाधिकलेपापेक्षयायथा
योग्यंप्रत्येकंसमुदायाभ्यां व्यवस्था । यमः । खननात्पूरणाद्दाहाल्लेपनादभिवर्षणात् । गोभिराक्रमणात्कालाद्भूमिः शुद्ध्यतिसप्तभिः ।
बौधायनः । घनायाभूमेरुपलेपनंसुषिरायाःकर्षणंक्लिन्नायाश्चामेध्यमाहृत्यप्रच्छादनम् । घनानिबिडा । अविषमेतियावत् । सुषिरासच्छिद्रावि
षमेतियावत् । क्लिन्नाअमेध्यार्द्रातस्याश्चामेध्यमाहृत्यआकृष्यप्रच्छादनंशुद्धमृदंतरेणपूरणं । संवर्त्तः । गृहशुद्धिंप्रवक्ष्यामिअन्तःस्थशवदूषि
ते । प्रोत्सृज्यमृण्मयंभांडंसिद्धमन्नंतथैवच ॥ गृहादपास्यततसर्वंगोमयेनोपलेपयेत् ॥ गोमयेनोपलिप्याथछागेनाघ्रापयेद्बुधः । ब्राह्मणैर्मंत्रपूतै
श्चहिरण्यकुशवारिणा । सर्वमभ्युक्षयेद्वेश्मततःशुद्ध्यत्यसंशयं । यमः । ब्राह्मणावसथेभूमिर्देवागारेतथैवच ॥ मेध्याचैवसदामन्येगवांगोष्ठेतथै
वच । एतेषुयाभूमिस्तांमेध्यांमन्येदित्यर्थः । अनुपहतविषयचैतत् । ब्रह्मपुराणे । देवानांप्रतिमाश्चापिवेश्मान्यायतनानिच । [illegible]
ल्पंभूमेरुद्धृत्यसावकत ॥ ततस्तोयेनगोभिश्चदाहोल्लेखनमार्जनैः । शोधनीयाचमंत्रैश्चसरत्नैःपंचभिश्चभूः ॥ उद्धृत्यमृत्तिका [illegible]

लेनच ॥ ग्रामादुद्धृतंत्यक्त्वानगराच्चतुर्गुणम् ॥ भूमिः सर्वत्रमेध्यास्याद्यत्रलेपानदृश्यते । मरीचिः । गृहक्षेत्रादिसर्वस्वशुचिःस्यादलेपना
त् । संवासोयदिजायेतदाहतापैर्विनिर्दिशेत् ॥ अत्रातिश्चांडालःसंवेशेप्रवेशे संवासोऽवस्थितिः । याज्ञवल्क्यः । रथ्याकर्दमतोयानिस्पृष्टा
न्यंत्यश्ववायसैः । मारुतार्केणशुद्ध्यंतिपक्वेष्टकचितानिच ॥ अंत्यश्चांडालः । तथा ॥ पंथानश्वविशुद्ध्यंतिसोमसूर्यांशुमारुतैः । निर्लेपविष
यमेतत् । बौधायनः । अनेकोद्गाद्येदारुशिलेभूमिरमेध्यष्टकाश्वसंकीर्णीभूताः । संकीर्णीभूताः परस्परंसंबद्धाइत्यर्थः । पराशरः । रथ्याकर्द
मतोयानिनावःपंथास्तृणानिच । स्पर्शनान्नप्रदुष्यंतिपक्वेष्टकचितानिच ॥ अथोदकशुद्धिः । मनुः । आपःशुद्धाभूमिगतावितृष्णायत्रगो
र्भवेत् । अव्याप्ताश्चेदमेध्येनगंधवर्णरसान्विताः ॥ विष्णुः । भूमिष्ठमुदकंशुद्धंवितृष्णायत्रगोर्भवेत् । अव्याप्तंचेदमेध्येनतद्वदेवशिलागतं ॥
देवलः । उद्धृतावाप्रशस्यंतेशुद्धैःपात्रैर्यथाविधि । एकरात्रोषितस्तास्तुत्यजेदापः समुद्धृताः ॥ एकरात्रोषितइत्यत्रपर्युषितत्वमात्रेतात्पर्यं ।
तथा । अदुष्टानामपांनास्तिप्रसृतानांचदूषणम् । स्तोकानामुद्धृतानांचकश्मलैर्दूषणंभवेत् ॥ प्रसृतानांपर्वतनिर्झररूपाणां ।
तथा । तत्राक्षोभ्यतडागादिनदीवाप्यःसरांसिच । कश्मलाशुचियुक्तानितीर्थतःपरिवर्जयेत् । कश्मलंशवादिअशुचिविण्मूत्रा
दितीर्थइति सप्तम्यंतात्तसिल् तेनकश्मलाशुचियुक्तानिचतीरदेशेवर्जयेदित्यर्थः । शंखलिखितौ । आपोरूपरसगंधवत्यः पांशु
द्वार्जीर्णचर्मकरंडकैरप्युद्धृताः चर्मकरंडश्चर्मपुटः । यमः । प्रपामरण्येघटकंचकूपेद्रोण्यंजलंकोषगतास्तथापः । ऋतेपिशूद्रात्तदपे
यमाहुरापद्गतोभूमिगताःपिबेत्तु । प्रपास्थितंजलंघटिकंघटकस्थितंजलं घटकोऽत्रकूपादौ सर्वसाधारणजलोद्धारपात्रंकलशादितज्जलं
द्रोणी काष्ठांबुवाहिनी कूपादावेववादिजलपानार्थंकोशश्चर्मपुटःऋतेपिशूद्रात् शूद्रेतरस्वामिकंद्विजस्वामिकमपिशूद्रस्वामिकम

पिचप्रपादिस्थितजलमित्यर्थः । हारीतः । रात्रावेतावरुणंप्रविशंतितस्मान्नरात्रौगृह्णीयात् । घाम्नोघाम्नइत्याग्नेमुपरिष्ठाद्दास्यमग्रु
हीयात् । बृहस्पतिः । उच्छिष्टंमलिनंक्लिन्नंयच्चविष्ठानुलेपितम् । अद्भिःशुद्ध्यतितत्सर्वमपांशुद्धिःकथंभवेत् ॥ सूर्येन्दुरश्मि
पातेनमारुतस्पर्शनेनच ॥ गवांमूत्रपुरीषेणशुद्ध्यंत्यापइतिस्थितिः ॥ उशनाः । नद्यःकूपतडागानिसरांसिसरितस्तथा ॥ असंवृत्ता
न्यदोषाणिमनुःस्वायंभुवोब्रवीत् ॥ सरितःसरणशीलानिर्झररूपाःअसंवृत्तानिअस्पृश्यस्पृष्टान्यपीत्यर्थइतिकल्पतरुः । विष्णुः ।
मृतपंचनखात्कूपादत्यंतोपहतात्तथा ॥ अपःसमुद्धरेत्सर्वाःशेषंशास्त्रेणशोधयेत् ॥ वह्निप्रज्वालनंकृत्वाकूपेपक्वेष्टकाचिते ॥ पंच
गव्यंन्यसेत्पश्चान्नवतोयंसमुद्धरेत् ॥ जलाशयेषुचान्येषुस्थावरेषुवसुंधरे ॥ कूपवत्कथिताशुद्धिर्महत्सुचनदूषणम् ॥ अत्रात्यंतोप
हतत्वंपुरीषादिना अतिव्याप्तत्वंनतुपारिभाषिकमत्यंतोपहतत्वं तत्रशरीरमलमात्रस्यग्रहणेअश्रुपातादावपिइयंशुद्धिःस्यात्तथाच्या
तिप्रसंगः आपस्तंबेनचशकृन्मूत्राद्युपघातेशुद्ध्यंतरकथनाच्च । तथाचापस्तंबः । उपानन्म्लेच्छविण्मूत्रस्त्रीरजोमद्यमेवच । ए
भिश्चदूषितेकूपेकुम्भानांषष्टिमुद्धरेत् । कुंभावांजलपूर्णानामित्यर्थः ॥ बृहस्पतिः । श्वभिःश्वपाकचाण्डालैर्दूषितेषुविशोधनम् ।
उद्धरेदुदकंसर्वमार्जनंपारिशोधनम् ॥ श्वपाकश्चाण्डालविशेषः । तथा । वापीकूपतडागेषुदूषितेषुविशोधनम् ॥ घटानांशतमुद्धृत्यपंचग
व्यंततःक्षिपेत् ॥ वापीसोपानयुक्तःकूपः । एवंचयत्रघटशतोद्धरणेनैवसर्वोद्धारोभवेत् । तत्रैवसर्वोद्धारोभवेत् अधिकजलेघटशतोद्ध
रणंकृत्वापंचगव्यप्रक्षेपः अतिमहत्सुतडागादिषुदोषाभावएवेतिव्यवस्था । यमः । अजागावोमहिष्यश्चब्राह्मणीचप्रसूतिका । दश
रात्रेणशुद्ध्यंतिभूमिस्थंचनवोदकं ॥ ब्रह्मपुराणे । नवस्नातजलंगावोमहिष्यश्छागयोनयः ॥ शुद्ध्यंतिदिवसेपदशभिस्तथा

श्यः ॥ मनुः । वापीकूपतडागेषुआपोग्राह्यास्तुसर्वतः ॥ पश्चात्पङ्येदमेध्यंतुपंचगव्येनशुध्यति । इत्युदकशुद्धिः । अथर
जस्वलाशुद्धिः । तत्रमनुः । शुद्धाभर्तुश्चतुर्थेह्निस्नानेनस्त्रीरजस्वला ॥ दैवेकर्मणिपित्र्येचपंचमे शुद्धिमाप्नुयात् ॥ तथा । प्रथमे
हनिचांडालीद्वितीयेब्रह्मघातिनी. ॥ तृतीयेरजकीप्रोक्ताचतुर्थेहनिशुध्यति ॥ अत्रचांडालीत्वाद्यतिदेशस्ततज्जातीयवदस्पृश्यत्वप्रति
पादनार्थः । वसिष्ठः । रजस्वला चत्रिरात्रमशुचिर्भवति साचनांजीतनाभ्यंजीतनाप्सुस्नायादधःशयीत नादिवासुप्यात् नमांसमश्नीयात्
नग्रहान्निरीक्षेत् नाग्निंस्पृशेत् नरज्जुंसृजेत् नदंतान् धावयेत् नहसेत् नाकिंचिदाचरेत् नखर्वेणपिबेत् नांजलिनापिबेत् नपात्रे
णलोहितायसेनचेतिविज्ञायतइति । खर्वोवामहस्तः लोहितायसंताम्रमितिरत्नाकरः । पैठीनसिः । त्रिरात्रंमलवद्वासोधारयमाणानस्ना
यात् नाभ्यंज्यात्नांज्यात् न नखान्निकृंतेत नोपमार्जयेत् नरज्जुंसृजेत् नदंतान्धावयेत् नस्रजंधारयेत् नगंधान्सेवेत । हारीतः ॥ भूमौ
कार्ष्णायसेपाणौमृण्मयेचाश्नीयात् । अत्रमिताक्षराकारः । दैवेकर्मणिपित्र्येचपंचमेशुद्धिमाप्नुयात् । इत्यत्रपंचमइतिरजोनिवृत्तिका
लोपलक्षणं । पंचमदिनात्पूर्वंरजोनिवृत्तावपिनशुद्धिर्दैवपित्र्येचकर्मणि । यदातुरजोदर्शनदिनादारभ्य पुनःसप्तदशदिनाभ्यंतरेरजः
संभवस्तदाअशुचित्वंनास्त्येव । अष्टादशदिनेरजःसंभवेत्त्वेकाहाच्छुद्धिः । एकोनविंशेद्व्यहात् । ततउत्तरेषुत्र्यहाच्छुद्धिः । तथाचात्रिः ॥
रजस्वलायदिस्नातापुनरेवरजस्वला । अष्टादशदिनादर्वागशुचित्वंनविद्यते ॥ एकोनविंशतेरर्वागेकाहंस्यात्ततोद्व्यहम् । विंशतिप्रभृत्यु
त्तरेषुत्रिरात्रमशुचिर्भवेत् ॥ यत्तुचतुर्दशदिनादर्वागशुचित्वंनविद्यतइतिस्मृत्यंतरंतत्रस्नानप्रभृतित्वमभिप्रेतमतोनविरोधः । अयंचाशु
चित्वनिषेधोयस्याविंशतिदिनोत्तरकालमेवप्रचुररजोदर्शनंतद्विषयं । यस्याः प्रौढयौवनायाः प्रागेवाष्टादशदिनात्प्राचुर्येण जोनिर्गम

स्तस्यास्त्रिरात्रमेवाशौचम्। पाराशरः। स्नानेनैमित्तिकेप्राप्तेनारीयदिरजस्वला ॥ पात्रान्तरेणतोयेनस्नानंकृत्वाव्रतंचरेत् ॥ व्रत
रजस्वलानियमंचरेदित्यर्थः ॥ सिक्तगात्राभवेदाद्भिः सांगोपांगाकथंचन ॥ नवस्त्रपीडनंकुर्यान्नान्यद्वासश्चधारयेत् ॥ उशनाः। ज्वरा
भिभूतायानारी रजसाचपरिप्लुता ॥ कथंतस्याभवेच्छौचंशुद्धिः स्यात्केनकर्मणा ॥ चतुर्थेहनिसंप्राप्तेस्पृशेदन्यांतुसास्त्रियं ॥ सासचैलावि
गाह्यापः स्नात्वास्नात्वा पुनः स्पृशेत् ॥ दशद्वादशकृत्वो वा आचामेतपुनःपुनः ॥ अंतेचवाससांत्यागस्ततःशुद्धाभवेत्तुसा ॥
दद्याच्छक्त्याततोदानंपुण्याहेनविशुद्ध्यति ॥ एतत्सर्वमिताक्षरायामाहुः ॥ अथरजस्वलायाश्चाण्डालादिस्पर्शेशुद्धिः ॥ तत्रबृहस्प
तिः। पतितांत्यश्वपाकेनसंस्पृष्टास्त्रीरजस्वला ॥ प्रथमेह्नित्रिरात्रंतुद्वितीयेद्व्यहमेवच ॥ अहोरात्रंतृतीयेह्निचतुर्थेनक्तमेवच ॥
अंत्यश्चांडालः। श्वपाकस्तद्विशेषःटांकइतिप्रसिद्धइतिरत्नाकरः। त्रिरात्रमुपवासंकुर्यादितिवाक्यशेषः। मनुः। रजस्वलातुसंस्पृष्टा
शुनाजंबूकवायसैः ॥ निराहाराभवेत्तावद्यावत्कालेनशुद्ध्यति ॥ अत्रचसर्वत्रउपवासांतेपंचगव्यपानमपिकर्तव्यमिति भवदेवः। एवंन
टचर्मकाररजकादिस्पर्शेप्युपवासःपंचगव्यंचेत्यूहनीयमिति ॥ सएवउपवासासामर्थ्येंगिराः। चांडालःश्वपचोवापियद्यात्रेयींस्त्रियंस्पृ
शेत् ॥ अफालकृष्टैर्वर्तेतपंचगव्येनशुद्ध्यति ॥ श्वपचः टांकइतिप्रसिद्धः। आत्रेयींरजस्वलामित्यर्थः। अफालकृष्टैःहलकृष्टभूम्यनुत्पन्नैः
फलमूलादिभिः। अथान्यापिरजस्वलास्पर्शेशुद्धिः। तत्रकाश्यपः। रजस्वलातुसंस्पृष्टाब्राह्मण्याब्राह्मणीतुया ॥ एकरात्रंनिराहारापंचगव्ये
नशुध्यति ॥ रजस्वलातुसंस्पृष्टाराजन्याब्राह्मणीचया ॥ त्रिरात्रेणविशुद्धिः स्याद्व्याघ्रस्यवचनंयथा ॥ राजन्याराजन्ययेत्यर्थः। रजस्व
लातुसंस्पृष्टावैश्ययाब्राह्मणीतुया। पंचरात्रंनिराहारापंचगव्येनशुद्ध्यति ॥ रजस्वलातुसंस्पृष्टाशूद्रयाब्राह्मणीतुया ॥ षड्रात्रेणवि

शुद्धिः स्याद्ब्राह्मण्याः. कामचारतः ॥ अज्ञानतश्चरेदर्धं ब्राह्मणीसर्वस्पर्शने ॥ अत्रयथा रजस्वलाया ब्राह्मण्या रजस्वलाब्राह्मणीस्पर्शे
उपवासः पंचगव्यं च तथा क्षत्रियावैश्याशूद्राणां रजस्वलानांवास्वजातीयरजस्वलास्पर्शेउपवासः पंचगव्यं च । यथा ब्राह्मण्याक्षत्रिया
स्पर्शेत्रिरात्रमेवंक्षत्रियायावैश्यास्पर्शेवैश्यायाश्चशूद्रास्पर्शेत्रिरात्रमेव । तदुक्तम् । रजस्वलायदानारी ह्यन्योन्यमुपसंस्पृशेत ॥ सवर्णे
पंचगव्येनत्रिरात्रमसवर्णके ॥ पंचगव्येनउपवाससहितेनइत्यर्थः । हीनवर्णायास्तूत्तमवर्णरजस्वलास्पर्शेस्नानमात्रम् । तथाचबृहस्प
तिः । अधिकवर्णांरजस्वलांस्पृष्ट्वास्नात्वाश्नीयादिति । एवंचक्षत्रियान्यारजस्वलायाः शूद्रास्पर्शेपंचरात्रमित्यूहनीयम् । सर्वत्रचापवा
सासामर्थ्येअफालकृष्टनीवारादिप्रवर्त्तनं । यत्तुमार्कण्डेयेनोक्तं । उदक्यातुसवर्णास्त्रीस्पृष्टाचेत्स्यादुदक्यया ॥ तस्मिन्नेवाहनिस्नाता
शुद्धिमाप्नोत्यसंशयं ॥ तत्स्नानात्पूर्वंचतुर्थदिनस्पर्शविषयं । यदितूच्छिष्टारजस्वलाउच्छिष्टरजस्वलयास्पृश्यते । तत्राङ्गिराः ॥
उच्छिष्टोच्छिष्टसंस्पृष्टाकदाचित्स्त्रीरजस्वला ॥ पूर्वाकृच्छ्रंप्रकुर्वीतशूद्रादानोपवासतः ॥ अत्रपूर्वाशब्दस्त्रैवर्णिकस्त्रियमाह तेनाय
मर्थः । ब्राह्मण्यादीनामुच्छिष्टानांरजस्वलानामुच्छिष्टसजातीयरजस्वलास्पर्शेकृच्छ्रंप्राजापत्यं । शूद्रातुरजस्वलांउच्छिष्टातथाविधशूद्र
यास्पृष्टाउपवासंकृत्वाब्राह्मणायकिंचिद्दत्त्वाशुद्ध्यति । एवंचब्राह्मण्यास्तथाविधायास्तथाविधक्षत्रियास्पर्शेप्राजापत्यद्वयं । वैश्यास्पर्शेप्रा
जापत्यत्रयम् । शूद्रास्पर्शेप्राजापत्यचतुष्टयं । एवंक्षत्रियायाः वैश्यास्पर्शेप्राजापत्यद्वयं शूद्रास्पर्शेक्षत्रियायाः प्राजापत्यत्रयं । शूद्रास्पर्शेप्रा
जापत्यंचतुष्टयंवैश्यायाः शूद्रास्पर्शेप्राजापत्यद्वयमित्यूहनीयं । सर्वंचैतत्कामतःस्पर्शेअकामतस्तदर्द्धं । यदितूच्छिष्टारजस्वला रजकादि
नास्पृश्यतेतदात्रिरात्रं । यदिपुनस्तैरुच्छिष्टैः स्पृश्यतेतदाप्राजापत्यं ॥ यदाशृगालकुक्कुटादिभिरप्युच्छिष्टारजस्वलास्पृश्यतेतदाप्रा

जापत्यमितिगृह्नीयं । कृच्छ्रप्राजापत्यंचादिनत्रयं । दिवाएकवारभोजनंदिनत्रयरात्रावेकवारभोजनं । दिनत्रयमयाचितान्नभोजनंदिनत्रयंचो
पवासः एवंद्वादशदिनसाध्यंव्रतमेतत् । तथाचमनुः । त्र्यहंप्रातस्त्र्यहंसायंत्र्यहमद्यादयाचितं । त्र्यहंपरंचनाश्नीयात्प्राजापत्यविधिःस्मृ
तः ॥ एकाधेनुश्चात्रदेयेतिभवदेवः ॥ इतिरजस्वलाशुद्धिः ॥ अथोच्छिष्टस्पर्शशुद्धिः । तत्रबौधायनः । चांडालैःपतितैःस्पृष्टोविण्मूत्रेतु
कृतोद्विज । त्रिरात्रं तुव्रतंकुर्याद्भुक्त्वोच्छिष्टःषडाचरेत् ॥ इदंकामतःस्पर्शविषयं । तत्रषडुपवासेएकाधेनुः त्रिरात्रंव्रतंत्रिरात्रोपवासमि
त्यर्थः । हारीतः । अनुच्छिष्टेतुसंस्पृष्टेस्नानंयेनविधीयते । उच्छिष्टस्तेनसंस्पृष्टःप्राजापत्यंसमाचरेत् ॥ प्राजापत्यंद्वादशाहसाध्यंपूर्वप्रकर
णशेपेकथितं । एतच्चकामतोभुक्त्वोच्छिष्टास्पृश्यविषयं । आंगिराः । भुक्त्वोच्छिष्टस्त्वनाचांतश्चांडालैःश्वपचेनवा ॥ प्रमादात्स्पर्शनंग
च्छेत्तस्यकुर्याद्विशोधनं । गायत्र्यष्टसहस्राणिद्रुपदांवाशतंजपेत् । त्रिरात्रोपोषितोभूत्वापंचगव्येनशुध्यति । श्वपचः टांकइतिप्रसिद्धः ।
इदंमकामतोभुक्त्वोच्छिष्टविषयम् । आपस्तंबः । चांडालेनतुसंस्पृष्टोविशौचस्तुद्विजोत्तमः । उपोष्यरजनीमेकांपंचगव्येनशुध्यति ।
इदमकामतोऽप्युच्छिष्टविषयं । सर्वंचेदंरजस्वलास्पर्शेकुक्कुटादिभिश्चनाभेरूर्ध्वंस्पर्शेसमानंविज्ञेयं । नाभेरधः कुक्कुटादीभिःस्पर्शेउच्छि
ष्टस्यस्नानमात्रम् । तथाचकुक्कुटादीनुपक्रम्याङ्गिराः । ऊर्ध्वंनाभेःकरौमुक्त्वायदंगमुपहन्यते । तत्रस्नानमधस्तात्तुप्रक्षाल्येनैवतच्छुचि
अत्रानुच्छिष्टस्यनाभ्यधःकुक्कुटादिस्पर्शेआचमनविधानादुच्छिष्टस्यस्नानमेवायाति । उच्छिष्टमदिरास्पर्शे वृद्धमनुः । आन्वधः
स्नानमात्रंस्यादानाभेरेकरात्रकं । नाभेरूर्ध्वंत्रिरात्रंस्यान्मदिरास्पर्शनेविधिः । हारीतः । उच्छिष्टस्तुस्पृशेद्विप्रश्चांडालंश्वंकथंचन ।
ऊर्ध्वोच्छिष्टस्तुसंस्पृष्टोद्विजः सांतपनंचरेत् ॥ अधोच्छिष्टोयदातुस्यात्प्रायश्चित्तंभवेदिदं । त्रिरात्रमुपवासःस्यात्पंचगव्येनशुध्यति ।

सांतपनंतुप्रथमदिनेपंचगव्यमात्रपान द्वितीयदिनेउपवासः । तथा । याज्ञवल्क्यः । कुशोदकंतुगोक्षीरंदधिमूत्रंशकृद्घृतम् । प्राश्यापरे
द्युरुपवसेत्कृच्छ्रंसांतपनंचरन् ॥ अंगिराः । चांडालोदकसंस्पर्शेस्नानमेवसमाचरेत् । उच्छिष्टनतुसंस्पृष्टस्त्रिरात्रेणविशुध्यति ॥
चांडालादिस्पर्शेअकृतस्नानस्यभोजनाद्यापस्तम्बः । संसर्गन्तुयदागच्छेच्छत्रोदक्यांत्यजैःसह । एतेरेवयदास्पृष्टःप्रायश्चित्तंकथं
भवेत् । भोजनेतुत्रिरात्रंस्यात्पानेतुद्व्यहमेवहि । मैथुनेपादकृच्छ्रःस्यात्तथामूत्रपुरीषयोः ॥ दिनमेकंतथामूत्रेपुरीषेतुदिनद्व
यम् ॥ एकाहस्तत्रनिर्दिष्टोदंतधावनभक्षणे । पादकृच्छ्रःचतुर्दिनसाध्यः । तत्रप्रथमदिनएकभुक्तंततोनक्तभोजनंततोऽयाचितभो
जनं ततउपवासः । तथाचयाज्ञवल्क्यः । एकभक्तेननक्तेनतथैवायाचितेनच । उपवासेनचैकेनपादकृच्छ्रःप्रकीर्तितः ॥ अत्यंताभ्या
सेविशेषमाहापस्तंबः । चांडालंचैवसंस्पृश्ययश्चाश्नीयात्तुकामतः । द्विजश्चांद्रायणंकुर्यात्प्राजापत्यमथापिवा ॥ प्राजापत्यंस्वस्व
अशुद्धिप्रकरणेकथितं । चांद्रायणमाह वसिष्ठः । एकैकंवर्द्धयेत्पिंडंशुक्लेकृष्णेचह्रासयेत् । अमावास्यांनभुंजीतएषचांद्रायणःस्मृतः ॥
पिंडश्चमयूरांडप्रमाणः । अमावस्याममावास्यायामित्यर्थः । तैलाद्यभक्तस्यचांडालादिस्पर्शे । आपस्तम्बः । येनकेनचिद
भ्यक्तश्चांडालंप्रतितंस्पृशेत् । उपवासेनचैकेनपंचगव्येनशुद्ध्यति ॥ तथा । चर्मकारंचरजकंधीवरंनटमेवच । एतान्स्पृष्ट्वाद्विजोमो
हादाचामेत्प्रयतोपिसन् ॥ एतैःस्पृष्टोद्विजोच्छिष्टएकरात्रंपयःपिबेत् । तैरुच्छिष्टैस्त्रिरात्रंस्याद्घृतंप्राश्यविशुद्ध्यति । पयोत्रजलं ।
सर्वत्रचात्रउभयोरप्युच्छिष्टयोःस्पर्शेद्विगुणंद्रष्टव्यं । तथाचबृहस्पतिः । उच्छिष्टोच्छिष्टसंस्पर्शः कदाचिदुपजायते । वर्णानांतुस
जातीनामुपस्पृश्यततःशुचिः ॥ उच्छिष्टस्यउच्छिष्टसंस्पर्शइत्यर्थः ॥ इदंचाकामतः स्पर्शविषयं । कदाचिदितिवचनात् । कामतः

स्पर्शे आपस्तम्बः । विप्रो विप्रेणसंस्पृष्टउच्छिष्टेनकदाचन । स्नायात्तेनविशुद्धिःस्यादापस्तंबोब्रवीदिदं ॥ क्षत्रियेणयदास्पृष्टउच्छिष्टस्तु
कथंचन ॥ स्नानंजपस्तुत्रैकाल्यंदिनस्यान्तेघृतंपिबेत् ॥ एवमेववैश्यस्पर्शेसर्वत्रद्वयोरपि उच्छिष्टत्वंज्ञेयम् । तथा । उच्छिष्टोच्छि
ष्टसंस्पृष्टः शुनाशूद्रेणवैद्विजः । उपोष्यरजनीमेकांपंचगव्येनशुद्ध्यति ॥ उच्छिष्टेनशूद्रेण उच्छिष्टस्पर्शइत्यर्थः । तथा । तै
लाभ्यक्तस्त्वनाचान्तः श्मश्रुकर्मणिमैथुने । मूत्रोच्चारंयदाकुर्यादहोरात्रेणशुद्ध्यति । उच्छिष्टस्यश्वकाकादिविष्ठास्पर्शेस्नानशुद्धि
प्रकरणे एव शुद्धिरुक्ता । चांडालादिस्पर्शे अकृतस्नानशयनेदोषमाह यमः । चांडालैः श्वपचैः स्पृष्टोनिशिस्नानं समाचरे
त् । नवसेत्सदनंरात्रौसद्यः स्नानेनशुद्ध्यति ॥ अथ तत्रवसेद्रात्रावज्ञानादविचक्षणः । तदातस्यतुतत्पापंशतधापरिवर्त्तते । अ
थस्वभावशुद्धाः तत्रमनुः । नित्यंशुद्धः कारुहस्तः पण्यंयच्चप्रसारितं । ब्रह्मचारिगतंभैक्ष्यंनित्यंमेध्यमितिस्थितिः ॥ नित्य
शुद्धः अमेध्यानुपहतः प्रक्षालनव्यतिरेकेणैवस्वव्यवहारोचितइत्यर्थः । कारुःशिल्पी पण्यं विक्रय्यंक्रयदेशेप्रसारितं यच्चाविद्धा
न्नव्यतिरिक्तंविवक्षितं । मनुविष्णू । नित्यमास्यं शुचिस्त्रीणांशकुनिः फलपातने । प्रस्रवेचशुचिर्वत्सःश्वामृगग्रहणेशुचिः । वसिष्ठः ।
वत्सः प्रस्रवनेमेध्यःशकुनिःफलपातने । स्त्रियश्च रतिसंसर्गेश्वामृगग्रहणेशुचिः स्त्रीमुखमुच्छिष्टाद्यनुपहतं । प्रस्रवनेदोहानुकूलस्तनपाने
फलपातनेमुखेनवृंतात्फलविभाजने । स्त्रियश्चस्वभार्याएव । मनुः । श्वनिहतस्ययन्मांसंशुचितन्मनुरब्रवीत् । क्रव्याद्भिश्चहतस्यान्यै
श्चांडालाद्यैश्चदस्युभिः । मांसंशुचि भक्ष्यतयैवयत्प्रकल्पितंतदेव क्रव्याद्भिर्व्याघ्रादिभिः । यमः । बालकैर्यत्परिक्रांतं
स्त्रीभिराचारितंचयत् । मशकैर्मक्षिकाभिश्चनिलीनंनोपहन्यते ॥ निलीनमाक्रांतम् । अदोषंतुमुखं स्त्रीणांगवांपृष्ठमजामुखम् ॥ एता

निनित्यंशुद्धानियच्चवाचाप्रशस्यते ॥ आत्मशय्यासनंवस्त्रंमेध्यंबालमदूषकं । ब्रह्मचारिगतंभैक्ष्यं नित्यं मेध्यमितिस्थितिः ॥ स्त्रीमुखंरतिसमयेशुचि । स्त्रीमुखंरतिचुंबनइति पैठीनसिवाक्यात् । आसनंशयनंपानं स्त्रीमुखंकुतुपंक्षुरं । नदूष्याणि विद्वांसोयज्ञेषुचमसंतथा । कुतुपोनेपालकंबलःक्षुरमितरप्रुंडव्यापृतमपि । गौरश्वोविप्रुषश्छायामाक्षिकाःशलभाःशुकाः । अजो हस्तीरणेऽरण्यंश्मश्रुश्चन्द्रसूर्ययोः ॥ श्वपुचिरग्निरजोवायुरापोदधिघृतंपयः । सर्वाण्येतानिशुद्धानिस्पर्शमेध्यानिनित्यशः ॥ यस्मादे तानिशुद्धानितस्मादशुचिस्पर्शमेध्यानिछायातुचांडालादन्यस्यमेध्या । तथाचब्रह्मपुराणे । चांडालपतितच्छायास्पर्शंदुष्टातनुर्भवेत् ॥ सुमंतुः । घृतघटकलागाराणामभोज्यान्नानामदोषः । अभोज्यान्नानामपिघृतघटादयोनदुष्टाइत्यर्थः । बौधायनः । अदुष्टासंततधारा वातोद्धूताश्चरेणवः । आकराः शुचयःसर्ववर्जयित्वासुराकरं । शातातपः । रेणवःशुचयःसर्वेवायुनासमुदीरिताः । अन्यत्ररास भाजाविश्वसमूहनिवाससतां ॥ समूहनिर्मार्जनी । देवलः ॥ गोशकृच्छुद्धदेशस्थंश्मशानादुद्धृतंशिवम् । अग्राम्यामृद्भवेच्छुद्धाशुक्लाविण्मूत्रव र्जिता ॥ गोमयंशुद्धदेशस्थंश्मशानादुद्धृतंशुचि । तेनश्मशानस्थितंनशुचि । तेनश्मशानस्थितंयावद्भवाततावदेवाशुचित्यर्थः । यमः ॥ पृष्ठतोगौर्गजःस्कन्धेसर्वतोश्वःशुचिस्तथा । नृणांमूत्रपुरीषेच अमेध्येमलमेवच । गोपुरीषंचमूत्रंचनित्यंमेध्यमितिस्थितिः ॥ शंखः ॥ शुद्धंनदीगतंतोयंसर्वएववतथाकराः ॥ मुखवर्ज्यांचगौःशुद्धामार्जारःक्रमणेशुचिः । देवलः । अकश्मलैःसमिद्धोग्निर्दुर्मनुष्यै रदूषितः । सर्वेषामप्यशौचानांसमर्थःशोधनायसः ॥ कश्मलेनैरःसमिद्धःप्रज्वालितः । कश्मलंचदेवलेनपरिभाषितं । मानुषास्थिशवो मज्जारेतोविण्मूत्रमेवच । कुणपंपूयमेतच्चकश्मलं समुदाहृतमिति ॥ दुर्मनुष्यैश्चांडालादिभिः । अदूषितःदूषितत्वं चस्पर्शग्रहणाभ्याम् ॥

अप्रवृषलभुक्तस्यग्रहणनास्त्यनापदि । श्वपाकोवृषलोभोक्ताब्राह्मणाग्निवनाहिनः । चांडालान्नरमध्यग्नःसूतिकाग्नेश्चकार्हिचित् ।
पतितानेश्चिताग्नेश्चनाशिष्टग्रहणंस्मृतं । बृहस्पतिः । पादोशुचीब्राह्मणानामजाश्वानांमुखंशुचि । गवांपृष्ठानिमेध्यानिसर्वं
गात्राणियोषिताम् ॥ अश्वानडुहाअश्वःसर्वत्रमेध्यःपूर्वमुक्तः । याज्ञवल्क्यः । स्त्रीदुष्यतिजारेणनाग्निर्दहनकर्मणा । नापो
मूत्रपुरीषाभ्यांनद्विजोवेदकर्मणा । नस्त्रीत्यादेरर्थोग्रव्यवस्थाप्यः । नापइत्यपिजलाशयस्थितानामपांदूषणाभावमाह । जलाश
योपिकूपव्यतिरिक्तः । नद्विजोवेदकर्मणाप्रतिग्रहेणेत्यर्थः । मनुः । ऊर्ध्वंनाभेर्यानिखानितानिमेध्यानिसर्वशः । यान्यधःस्यान्यमे
ध्यानिदेहाच्चैवमलाश्च्युताः । खानिछिद्राणिमेध्यानिस्पृश्यानि । अमेध्यानि अस्पृश्यानि देहाच्च्युतामलानखादयो अमेध्याअस्पृ
श्याइत्यर्थः । यमः । दिवासूर्यांशुसंतप्तंरात्रौनक्षत्रमारुतैः । संध्ययोरप्युभाभ्यांचपवित्रंसर्वदाजलं ॥ व्यासः । अच्छिन्नाग्रंतुयद्वस्त्रंमृदाप्र
क्षालितंचयत् । अहतंधातुरक्तंचतत्पवित्रमितिस्थितिः ॥ अनुक्तशुद्ध्यंतरे मनुः । त्रीणिदेवाः पवित्राणिब्राह्मणानामकल्पयन् ।
अदृष्टमद्भिर्निर्णिक्तंयच्चवाचाप्रशस्यते ॥ अदृष्टमपवित्रतयास्वयमज्ञातंनिर्णिक्तंप्रक्षालितं । ब्राह्मणानामितिचातुर्वर्ण्योपलक्षणं ।
यमः । बलात्कारोपभुक्तायाचोरहस्तगतापिवा । स्वयंविप्रतिपन्नावाअथवाविप्रमादिता ॥ अत्यंतदूषितापिस्त्रीनपरित्यागमर्हति । सर्वे
षांनिष्कृतिःप्रोक्तानारीणांतुविशेषतः ॥ एतत्समानविषयमेव नस्त्रीदुष्यतिजारेणेतिवाक्यम् । निष्कृतिः प्रायश्चित्तं । प्रायश्चित्तमेवद
र्शयति । स्त्रियःपवित्रमतुलंनैतादुष्यंतिकर्हिचित् । मासिमासिरजस्तासांदुष्कृतान्यपकर्षति । सोमःशौचंददौतासांगंधर्वाश्चशुभांगिरं ।
पावकः सर्वमेध्यत्वंनित्यंमेध्याहियोषितः ॥ याज्ञवल्क्यः ॥ व्यभिचाराहतौशुद्धिर्गर्भेत्यागोविधीयते । भर्तृगर्भवधेतासांतथामहतिपा

तके अस्यार्थः । स्त्रीणामृतौ प्रवृत्तेसतिपूर्वकृताद्व्यभिचाराच्छुद्धिर्भवति । व्यभिचारेणयदिगर्भोवृत्तस्तदाऽस्याः स्त्रियं त्यागएव
विधेयः । भर्तृवधेगर्भवधेमहापातकेचतस्यास्त्यागः । तथा । स्वच्छंदगाहियानारीतस्यास्त्यागोविधीयते । नचैवस्त्रीवधंकुर्यान्नचै
वांगविकर्त्तनम् ॥ वसिष्ठः ॥ चतस्रस्तुपरित्याज्याः शिष्यगागुरुगाचया ॥ पतिघ्नीचविशेषेणजुंगितोपगताचया ॥ जुंगितो
निंदितः शूद्रादिः । हारीतः । गर्भघ्नीमधोवर्णगांशिष्यसुतगामिनीं पापव्यसनासक्तांधनधान्यक्षयकरांवर्जयेद्व्यभिचारिणीं ।
अधोवर्णोऽपकृष्टवर्णः शूद्रः ॥ शंखलिखितौ ॥ एकव्रतस्कन्नभावात्परोपहतत्वाच्चदुष्टा । कुलसंकरकारिण्योभवंति । एकव्र
तस्कन्नभावात् एकव्रतं पातिव्रतंतत्त्वादित्यर्थः । तथा । चांद्रायणंचतासांपावनमित्याचार्याः प्राजापत्यंवा । तदि
यमत्रव्यवस्था । स्त्रीणांमदमोहबलात्कारादिप्रमादजातेव्यभिचारेयाज्ञवल्क्यवाक्यादार्त्तवेनशुद्धिः । कामकृतेव्यभिचारेशंखलिखित
वाक्यात्प्रायश्चित्तेनशुद्धिः ॥ गुरुशिष्यसुतपतितानांचगमनेऽन्यतोगर्भपातनेभर्तृवधेब्रह्महत्यादिमहापातकेचमनुवाक्या
त्त्यागः । यत्तुबलात्कारादिव्यभिचारेपित्रिरात्रंप्रायश्चित्तंस्मर्यते तदसंजातरजस्कायानिवृत्तरजस्कायाश्चद्रष्टव्यम् । एवंचसतियत्रदेशे
व्यभिचारिणीनांब्राह्मणीनांनप्रायश्चित्तमुपदिश्यतेनचकृतेप्रायश्चित्तेपरिग्रहइतिप्रसंगभयेनाक्रियतइतिसमाचारस्तत्रतथैवव्यवहर्त्तव्यं ।
तथाचमरीचिः । येषुस्थानेषुयच्छौचंधर्माचारस्तुयादृशः । तत्रतन्नावमन्येतधर्मस्तत्रैवतादृशः ॥ येषुदेशेषुयेदेवायेषुदेशेषुये
द्विजाः । येषुस्थानेषुयत्तोयंयाश्चयत्रैवमृत्तिका ॥ इतिशुद्धिविवेकेतृतीयः परिच्छेदः ॥ शुद्धोसमतानिबन्धान्दृष्ट्वानुमतःपितुस्तथाभ्रातुः ।
रुद्रधरेणकृतोयंशुद्धिविवेकः सतांप्रीत्यै । सामान्यतोत्रवर्णानांशुद्धिर्मरणजन्मनोः । प्रागथाशौचनियमात्ततस्तेषांविशेषतः ॥ शुद्धि

स्पृष्टात्ततोऽशौचसंकरे शुद्धिरीरिता ॥ विदेशस्थार्भकस्त्रीणां मरणे गर्भसंस्रवे ॥ शुद्धिर्मृत्युविशेषे च आसपिंडेष्वनंतरम् ॥ निर्हाराद
थवा शुद्धिरशुद्धिरहितास्तथा । अधिकारिविवेकोऽथानधिकारिनिरूपणं ॥ जलार्घानर्हकथनं पुत्राणां लक्षणं तथा । सपिंडानामिहततो
लक्षणं परिकीर्तितं ॥ देहशुद्धिः क्षालनादिशुद्धिरत्राथ कीर्तिता । स्नानशुद्धिस्तैजसादिद्रव्यशुद्धिरनंतरं । पक्वान्नशुद्धिर्भूशुद्धिः शुद्धिरन्नोदक
स्य च ॥ ततो रजस्वलाशुद्धिरुच्छिष्टस्पर्शने तथा स्वभावशुद्धिश्च तथा क्रमेणात्र प्रकीर्तिता ॥ ८ ॥ इति महामहोपाध्यायलक्ष्मीधरा
त्मजमहामहोपाध्यायश्रीहलधरानुजतमश्रीरुद्रधरकृतशुद्धिविवेकः समाप्तः ॥ श्रीः ॥ शुभम् ॥

इदं शुद्धिविवेकाख्यं पुस्तकं कल्याणनगर्यां श्रीकृष्णदासात्मज--गंगाविष्णोः
अध्यक्ष "लक्ष्मीवेंकटेश्वर" मुद्रणालये पं० शिवदुलारे वाजपेयीत्यनेन
स्वाम्यर्थं मुद्रयित्वा प्रकाशितम् । शकाब्दाः १८४३, संवत् १९७८.

पुस्तक मिलनेका ठिकाना–गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेंकटेश्वर" प्रेस कल्याण–मुंबई


शुद्धिविवेकग्रन्थविषयानुक्रमणिका प्रारभ्यते ।

प्रकरणम् ।	पृ	पत्र	पं.	प्रकरणम् ।	पृ.	पत्र	पं.	प्रकरणम् ।	पृ.	पत्र	पं.
अथसामान्यतश्चातुर्वर्ण्यस्य				अथगर्भस्रावाशौचम्	२	९	१३	अथपुत्रिकापुत्रलक्षणम्	२	२१	८
मृतकाशौचम्	१	१	८	अथासपिंडाद्यशौचम्	१	१२	२	अथपौनर्भवलक्षणम्	१	२२	३
अथजननाशौचम्	२	१	८	अथनिर्हाराद्यशौचम्	२	१४	२	अथकानीनः	,,	,,	५
अथजननमरणाशौचयोर्नियमः	१	२	११	अथानशौचिनः	२	१६	१३	अथगूढोत्पन्नः	,,	,,	१०
अथवर्णानांविशेषतो शौचम्	१	३	६	अथअधिकारिणः	२	१८	७	अथसहोढः	,,	,,	१३
अथाशौचसंकरः	२	४	१२	अथानधिकारिणः	१	२०	१०	अथदत्तकः	२	,,	१
अथविदेशस्थाशौचम्	१	६	११	अथोदकाद्यनर्हः	२	२१	५	अथक्रीतः	१	२३	१
अथबालाद्याशौचम्	२	७	३	अथपुत्रलक्षणम्	,,	,,	८	अथस्वयमुपगतः	,,	,,	५
अथक्षयशौचम्	२	८	१०	अथक्षेत्रजलक्षणम्	२	,,	२	अथापविद्धः	,,	,,	७

प्रकरणम् ।	पृ.	पत्र	पं.	प्रकरणम् ।	पृ.	पत्र	पं.	प्रकरणम् ।	पृ.	पत्र	पं.
[illegible]	,,	,,	१७	अथाचमनापवादः	१	२६	२	अथ[illegible]शुद्धिः	[illegible]	[illegible]	[illegible]
[illegible]	२	,,	१	अथस्नानशुद्धिः	२	,,	४	अथ[illegible]ताया[illegible]दि			
[illegible]क्षणम्	,,	,,	११	अथतैजसादिद्रव्यशुद्धिः	२	२९	८	शैशुद्धिः	[illegible]	[illegible]	[illegible]
[illegible]शुद्धिस्तत्र				अथात्यंतोपहतशुद्धिः	२	३१	८	अथान्यापि[illegible]शुद्धिः	[illegible]	[illegible]	[illegible]
[illegible]	१	२४	१२	अथपक्वान्नशुद्धिः	१	३२	७	अथोच्छिष्टस्पर्शशुद्धिः	[illegible]	[illegible]	[illegible]
[illegible]शुद्धिः	१	२८	३	अथभूमिशुद्धिः	१	३३	९	अथ[illegible]शुद्धिः	[illegible]	[illegible]	[illegible]
[illegible]	२	,,	१५	[illegible]दकशुद्धिः	१	३४	५				

इति शुद्धिविवेकस्थविषयानुक्रमणिका समाप्ता ॥

विक्रय्यपुस्तकानि-(धर्मशास्त्रग्रंथाः)



मनुस्मृति-सटीक कुल्लूकभट्टकृत संस्कृतटीकासहित	१-८
मनुस्मृति-सान्वय भाषाटीकासहित इसमें भगवान मनुजीके कहेहुए धर्म और गृहस्थ, ब्रह्मचर्य, वानप्रस्थ और संन्यास आश्रमके कर्म और राजाओंके नीतियुक्त प्रजापालन और अधर्मियोंके दंड इत्यादिका निर्णय आशौचनिर्णय आदि अनेक विषय संयुक्त हैं ग्लेज कागद	३-८
,, तथा रफ़	३-०
याज्ञवल्क्यस्मृति-पं० मिहिरचंद्रकृत मिताक्षरा नाम पदयोजना भावार्थ और तात्पर्यार्थ टिप्पणी तथा भाषाटीकासहित	६-०
अष्टादशस्मृति-मूलमात्र उपरोक्तविषयमें सर्वधर्मनिरूपण किया गयाहै....	१-०
,, तथा भा० टी० छपके तयार है	३-०
बृहत्पाराशरस्मृति-धर्मनिरूपणका अपूर्व ग्रंथ है	१-८
पाराशरस्मृति-उत्तरखंड इसमें रामानुज संप्रदायके तप्तचक्रांकित मुद्रा और वैष्णवोंका धर्म लिखागया है.	०-६
'जयसिंहकल्पद्रुम'-मूलमात्र (धर्मशास्त्र ग्रन्थ) यह ग्रन्थ जयपुर महाराज 'श्रीजयसिंहजी' की आज्ञासे सम्राट् पौंडरीक याजी 'श्रीरत्नाकर दीक्षितजी'-ने निर्माण कियाहै।	८-०

पुस्तकें मिलनेका ठिकाना—

गङ्गाविष्णु श्रीकृष्णदास, "लक्ष्मीवेङ्कटेश्वर" छापाखाना, कल्याण-मुंबई.

॥ इति शुद्धिविवेकः समाप्तः ॥